In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकविप्रणीता

कार्तिकोत्सवदीपिका

(चम्पूप्रबन्धः)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्यः के नीलकण्ठः
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकः परियोजना - अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy
संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (ii) - 22

श्रीकृष्णकविप्रणीता

॥ कार्तिकोत्सवदीपिका ॥

(चम्पूप्रबन्धः)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा के वरलक्ष्मीः

उपनिदेशिका

सहसम्पादकः परियोजना – अनुसन्धाता च

श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 22

Kārtikotsavadīpikā

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Kārtikotsavadīpikā

ISBN – 978-93-80171-89-0

© Sanskrit Academy

Year	: 2023
Pages	: xiv+37
Copies	: 300
Price	: ₹ 150

Digitized by Digitization Muthulakshmi Research Academy
Sanskrit Academy Śaṣṭiyabda Granthamala (ii)- 17

Kārtikotsavadīpikā

of

Sri Krishna Kavi

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor

Prof. K. Neelakantham

Director

Editor

Dr. K Varalakshmi

Dy. Director

Associate Editor & Project Investigator

K V Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University,

Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 22

Kārtikotsavadīpikā

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Kārtikotsavadīpikā

ISBN – 978-93-80171-89-0

© Sanskrit Academy

Year : 2023
Pages : xiv+37
Copies : 300
Price : ₹150

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

We have recently published seven Champu Kavyas authored by poets of Telangana State. They are: **Ramakrishna yudhisthiracharitachampu** of Sriman Perumalla Venkatarajakavi, **JagannathaChampu** of Jagannathaarya, **YudhishthiraashwamedhaChampu** of Venkata shastry, **Sri Venkatesha ChampuPrabandha** of Sriman Shirisinahal Perumandlacharya, **Raghunatha vijaya Champu and Srinivasavilasachampu of** Sri Krishnakavi. All these Kavyas were published in difficult Ancient Telugu script and were not known to the non-telugu Sanskrit world.

And now we are bringing out another beautiful Champukavya of the same poet Sri Krishnakavi to delight the hearts of Sanskrit scholars. This book was published long ago in 1767 in Telugu script from Sāhityamukura Mudrāksharashāla of Gadwala Samsthana by Sri Rama bhupalamani.

According to the History, this Sri Krishnakavi, is said to have been lived between 1830-1919 and composed 100 above books on various Shastras, Kavyas, Stotras.[1] He took Sannyāsāsrama on the advice of his gurus and became famous as Srimatparamahamsa Parivrajakācharya Sri Krishna Brahmateertha Yateendra[2].

Krishnakavi wrote this Kartikotsavachampu on the ceremony of Kartika month which is performed in grand

---

[1] The list of some of the books is given in the Sanskrit foreword.

[2] The details of life history of this great poet of Telangana given in the two books **Raghunatha vijaya Champu and Srinivāsavilāsa champu** which **are** published by us

In Public domain. Digitization Muthulakshmi Research Academy

manner to propitiate Lord Chennakeshava the presiding deity of Gadwal Samsthan. This champu Kavya consists of eight prose passages with full of merits of Gadyakavya of Sanskrit rhetoricians and 87 shlokas in various beautiful meters. His prose passages are very much similar to Banabhatta and the shlokas are of Kalidasa Bharavi and Magha. The special attraction of Kartikotsava in Gadwal Sansthan was **Shastrarthasabha** in which scholars of various shastras used to participate from different samsthanas. King Ramabhupala used to honor all the scholars with equal respect.

I congratulate Dr K. Varalakshmi our Deputy Director of the academy. She is very faithful and sincere to the work assigned to her. Dr Varalakshmi made a thorough research on the life of Krishnakavi and king Raghunatha of Gadwal Samsthan and now she did good research on present book **कार्तिकोत्सवदीपिकाचम्पूः** and made it ready for publication. I wish Dr K. Varalaksmi to bring some more critical studies based on the rare Sanskrit works.

I thank another deputy director Dr V. Subrahmanyam for his continuous help in the publication of Academy and congratulations to Sri K. V. Suryaprakash senior research assistant and in charge of project of reprinting of rare books. My thanks to Dr Joshi Santosh Kumar research assistant in the academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who is always ready for any assignment in the field of research and publications.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Ranjit Kumar Barman Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I

In Public domain. Digitization Muthulakshmi Research Academy

thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Gayatri Muralikrishna Director, Aadharsh Institutions in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

भारते उपषङ्गतं संस्थानानि स्वातन्त्र्यप्राप्तेः पूर्वं भवन्ति स्म इति **आन्ध्रसंस्थानमुलु-साहित्यपोषणमु** इति ग्रन्थे विद्वान् तूमाटिदोणप्पवर्यः उल्लिखितवान्। बहवः वीराः शासकाः धर्मनिरताः सन्तः संस्थानानि पालयन्ति स्म। देवालयान् निर्मान्ति स्म। पण्डितान् कवीन् पोषयन्ति स्म। काव्यानि शास्त्राणि रचयितुं शासकाः कवीन् पण्डितान् प्रेरयन्ति स्म। शास्त्रार्थान् आयोजयन्ति स्म। जनेषु आस्तिक्यबुद्धिं जनयितुं मन्दिरेषु श्रमसाध्यान् उत्सवान् आचरन्ति स्म। एतानि धार्मिककृत्यानि योग्यानां धर्मगुरूणां मार्गदर्शनेन आचरन्ति स्म संस्थानपालकाः।

1. **तेलङ्गाणाराज्यसंस्थानानि** - तेलङ्गाणाराज्ये विद्यमानेषु संस्थानेषु वनपर्ति-अमरचिन्तात्मकूरु-गद्वाल-जटाप्रोलु-दोमकोण्ड बोरवेल्लि-दुब्बाक-सीर्नवेल्लि-दोन्ति-पाल्वञ्च-पापन्नपेट-नारायणपुर-मुनगालेत्यादि चतुर्दश संस्थानानि प्रसिद्धानि आसन्। सुरपुर संस्थानमपि स्वातन्त्र्यप्राप्तेः पूर्वं नैजामसंस्थानान्तर्गतम् आसीत्।

2. **राजगुरुः** – पदवाक्यप्रमाणपारावारीणाः विद्वत्तल्लजाः संस्थानेषु राजगुरुपदम् अलङ्कुर्वन्ति स्म। संस्थानपालकान् धर्मम् उपदिशन्ति स्म। पुराणं दीक्षिताचार्यः गद्वालसंस्थानस्य राजगुरुः आसीत्। वनपर्तिसंस्थानस्य राजगुरुः नवदुर्गं कृष्णकविरासीत्। सुरपुरसंस्थानस्य राजगुरुः किरीटिवेङ्कटाचार्यश्चासीत्।

3. **वनपर्त्तिसंस्थानधर्मगुरुः नवदुर्गं कृष्णकविः**- शताधिक ग्रन्थकर्त्ता कृष्णकविः वनपर्त्तिसंस्थानस्य राजगुरुरासीत्। कालान्तरे श्रीश्रीश्रीकृष्ण ब्रह्मतन्त्रपरकालयतीन्द्रमहादेशिक इति सन्न्यासाश्रमे प्रथितोऽयं कविः

In Public domain. Digitization Muthulakshmi Research Academy

महीशूरसंस्थानपालकस्य चामराजेन्द्रस्य प्रार्थनया महीशूरसंस्थानगत परकालपीठाधिपत्यं स्वीचकार[3]।

4. नवदुर्गं कृष्णकविवाङ्मयम् – सुरवरं प्रतापरेड्डिसङ्कलिते गोलकोण्डकवुलसञ्चिका इति ग्रन्थे अष्टादशनवदशशतकयोः विद्यमानानां कविपण्डितानां समाचारः उपलभ्यते। तत्र आद्यं स्थानं भजति शताधिकग्रन्थकर्त्ता नवदुर्गं कृष्णकविः तद्विरचित वाङ्मयञ्च।

शालिवाहनशके 1761 (1840 क्रिस्ताब्दे) प्राप्तजन्मायं कविः शालिवाहनशके 1836 आनन्दकार्तिकबहुलपञ्चम्यां (1915 क्रिस्ताब्दे) परमपदमलञ्चकार।1885 क्रिस्ताब्दतः 1915 पर्यन्तं परकालपीठाधिपत्यं स्वीचकार।श्रीभगवद्रामानुजसिद्धान्तानुयायी कवितल्लजोऽयं कृष्णाम्बा-तातार्ययोः द्वैतीयीकनन्दनः।

5. नवदुर्गं कृष्णकविरचनावलिः –

1.परकालगुरुविजयचम्पूः	2. उत्तरपरकालचम्पूः
3. वेदपादस्तवः	4. प्रपन्नसौभाग्यस्तोत्रम्
5. सुभद्रापरिणयनाटकम्	6. सरस्वतीमूलधनम् (धर्मशास्त्रग्रन्थः)
7. लक्ष्मीसहस्त्रप्रकाशिका	8. हंससन्देशरसास्वादिनीव्याख्या
9. उन्मत्तपाण्डवम्	10. केशवोत्तममालिका
11. अलङ्कारमणिहारः	12. प्रसन्नान्दलहरी
13. श्रीकृष्णपञ्चरत्नमाला	14. श्रीरामायणवैभवम्
15. नव्योपाकर्मनिर्णयः	16. मेघमाला
17. समयामृतम्	18.सूर्योपरागदर्पणः

---

[3] नवदुर्गं कृष्णकवेः विपुलं वंशचरितं संस्कृतपरिषदा मुद्रितयोः रघुनाथविजयचम्पू-श्रीनिवासविलासचम्पूप्रबन्धयोः उपलभ्यते।

In Public domain. Digitization Muthulakshmi Research Academy

19. कल्याणगीतमञ्जरी
20.उत्तररङ्गमाहात्म्यं,
21. मदनगोपालमाहात्म्यं
22. आराधनक्रमः
23. स्वस्तिवाचनं
24. रघुनाथविजयः
25. शम्भुरहस्यम्
26. श्रीनिवाससुप्रभतम्
27. श्रीनिवासविलसचम्पूः
28. श्रीरामचन्द्रमङ्गलमालिका
29. श्रीशरदाम्बुजमाला
30. श्रीसर्वर्तुकुसुममाला
31. श्रीदशावतारस्तुतिः
32. श्रीमज्जार्जिचक्रवर्त्याशीर्मालिका
33. श्रीरामेश्वरविजयचम्पूः
34. कुरुमूर्तिश्रीनिवासलालिप्रहरी
35. कार्तिकोत्सवदीपिका
36. रङ्गराजविलासः
37.आचार्यवेदपादस्तवः
38.नवरत्नहारस्तवव्याख्यानं
39. काव्योत्कर्षरक्षा
40.नृसिंहविलासः
41.एकोद्दिष्टादन्नभोक्तृप्रायश्चित्तनिर्णयः
42.चपेटाहतिस्तुतिः
43.तिरुपतिवेङ्कटेश्वरगोविन्दनामानि
44.केशवोत्सवमालिका
45.श्रीकृष्णजयन्तीपौर्वापर्यनिर्णयः
46.शिष्टसिद्धान्तपद्धतिः
47. कर्तृक्रमनिर्णयः
48.स्वयंवक्तृप्रतिष्ठानिर्णयः
49.अधिकमासोत्सवनिर्णयः
50.सोदरकन्याद्वयविवाहनिर्णयः
51.अतिक्रान्तश्राद्धकालनिर्णयः
52.विवाहकालनिर्णयः
53.शूद्राशौर्निर्णयः
54.प्रपन्नाभरणं
55.वृत्तमुक्ताहारस्तुतिव्याख्या
56.विजयदशमीनिर्णयः
57.नूतनोपाकर्मनिर्णयः
58.विक्रान्तराघवं
59.प्रसन्नान्दस्तवः
60.प्रपन्नामृतस्तवः
61.श्रीरामवेदपादस्तवः
62.श्रीनिवासवेदपादस्तवः
63.देशिकेन्द्रवेदपादस्तवः
64.नवरत्नहारस्तवव्याख्यानं
65.श्रीरामदाससुप्रभातं
66.श्रीहयग्रीवसुप्रभातं
67.श्रीगोपालसुप्रभातं
68.श्रीरङ्गनाथसुप्रभातं
69.सूर्यदण्डकं
70.आचार्यगद्यं

In Public domain. Digitization Muthulakshmi Research Academy

71.वेदान्तदेशिकसुप्रभातं 72.हयग्रीवपञ्चरत्नस्तवः
73.श्रीनारायणाष्टकं 74.श्रीसम्पत्कुमाराष्टकं
75.श्रीरामाष्टकं 76.पञ्चायुधस्तोत्रं
77.श्रीनिवासरत्नमाला 78.लक्ष्मीनवरत्नमाला
79.अलङ्करणमालिका 80.कावेरीलहरीस्तुतिः
81.नेत्रोल्लासः 82.धर्मानुशासनं
83.आळवन्दार् स्तोत्रं 84.जितन्तेस्तोत्रं
85.चामराजेन्द्राशीर्नवरत्नमालिका 86.आह्निकरत्नं
87.श्रीमद्भागवतसप्ताहाह्वानपत्रिका
88.श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाष्टोत्तर-शतनामस्तोत्रम्
89.श्रीपरकालमठशिलाशासनश्लोकावलिः
90.उत्तररङ्गनाथाध्ययनोत्सवमण्टपशिलाशासनम्
91.उत्तररङ्गनाथमहाद्वारगोपुरशिलाशासनश्लोकावलिः
92.शङ्कराम्बासमुद्रशिलाशासनश्लोकावलिः
इत्यादयः शताधिकग्रन्थाः कृष्णकविना विरचिताः।

नवदुर्गं कृष्णकविवाङ्मयविशेषाः - कविरयं वनपर्त्तिसंस्थाने वीरराघवीययुक्तभागवतं परिशोध्य परिष्कृत्य च वनपर्त्तिसंस्थानपक्षतः मुद्रापितवान्। वनपर्तिराजारामेश्वररायप्रार्थनया चपेटाहतिस्तुतिं राज्ञ्याः शङ्कराम्बायाः प्रार्थनया रामेश्वरविजयचम्पूं व्यरचयत्। वनपर्तिशासकानां प्रार्थनया उत्तररङ्गमाहात्म्यं श्रीरङ्गापुरदेवस्थाने चारित्रकशिलाशासनानि च व्यरचयत्। जटाप्रोलु अथवा कोल्लापुरं संस्थानाधीश्वरस्य राजावेङ्कटजगन्नाथ रायस्य अभ्यर्थनया नृसिंहविलासं मदनगोपालमाहात्म्यं आत्मकूरु संस्थानाधीशस्य मुक्करसीतारामभूपालस्य प्रार्थनया तत्कुलदैवस्य प्रसिद्धश्रीवैष्णवक्षेत्रस्य श्रीकुरुमूर्तिदेवालयस्य तद्गतकुरुमूर्तिपादुकास्वीकरण

In Public domain. Digitization Muthulakshmi Research Academy

महोत्सवस्य वर्णनपरकं श्रीनिवासविलासचम्पूकाव्यं विञ्जूरपुराधिपस्य रघुनाथस्य दिव्यक्षेत्रयात्राम् तत्कुलदैवस्य नारानरसिंहस्वामिनञ्च अधिकृत्य रघुनाथ विजयचम्पूं गद्वालसंस्थानाधीश्वरस्य राजाश्रीरामभूपालप्रार्थनया तत्कुलदैवस्य गद्वालचेन्नकेशवस्वामिनमधिकृत्य कार्तिकोत्सवदीपिकाचम्पूम् व्यरचयत्।

उत्सवः - उद् उपसर्गपूर्वक सू धातोः अप् प्रत्ययविधिना उत्सवः इति पदं निष्पद्यते यस्य अर्थो भवति आनन्दजनकव्यापारः इति वाचस्पत्यम्। उत्पूर्वकसूधातोः अच् प्रत्ययविधिना यो उत्सवः शब्दः निष्पद्यते तस्य अर्थः नियताह्लादजनकव्यापारः अस्ति। आनन्दम् आह्लादञ्च जनयितुं प्रजासु पालकाः देवालयेषु उत्सवान् आचरन्ति।

वेदान्तं श्रीविष्णुभट्टाचार्यविरचितागमविमर्शग्रन्थानुसारं उत्सवो नाम उत्कृष्टः यज्ञविशेषः। सर्ववर्णाश्रमस्थनराणां धर्मोपदेशाय आस्तिकबुद्धिप्रेरणाय आनन्दजननाय उत्सवविग्रहाणां पूजनम् उत्सवपदेन निर्दिश्यते। ध्वजारोहण-देवताह्वान-बलिप्रदान-वीथ्युत्सवादिक्रियाकलापाः उत्सवे भवन्ति। ध्वजारोहणं मन्त्रपद्यगद्यरूपस्तोत्रैः देवताह्वानं हविस्समर्पणं रथ-गज-गरुडादिषु यानेषु उत्सवविग्रहाणां वीथीभ्रमणरूपः उत्सवः इति निर्दिश्यते।

नित्यशान्तिश्रद्धाभेदेन उत्सवः त्रेधा आचर्यते। वर्षे एकस्मिन् मासे यः आचर्यते स नित्योत्सवः इति निर्दिश्यते।

गद्वालसंस्थानम्–कार्तिकोत्सववर्णनम्

तेलङ्गाणाराज्यस्थ-गद्वालसंस्थानस्य पालकः रामभूपालः। तस्य कुलदेवता श्रीचेन्नकेशवः। गद्वालसंस्थाने श्रीचेन्नकेशवालयः विराजते। गद्वाल संस्थानस्य राजगुरुः पुराणं दीक्षिताचार्यः आसीत्। राजगुरोः आध्वर्यवे

 In Public domain. Digitization Muthulakshmi Research Academy

कार्तिकमासोत्सवः आचर्यते। नवदुर्गं कृष्णकविः कार्तिकोत्सवदीपिका चम्पूप्रबन्धे कार्तिकोत्सवम् अवर्णयत्। चम्पूप्रबन्धेऽस्मिन् अष्टौ दीर्घगद्यानि विशेषार्थशब्दालङ्कारमण्डिताः 87 श्लोकाश्च सन्ति। मालिनी शिखरिणी कृष्णवर्णा हरिणी पृथ्वी कामदत्ता नर्कुटं शार्दूलविक्रीडितं मत्तेभविक्रीडितं स्रग्धरा आर्या अनुष्टुप् वृत्तेषु श्लोकाः ग्रथिताः। अध्येतृणां सौलभ्याय श्लोक सूची वृत्तसूची च काव्यान्ते निर्दिष्टा ।

कार्तिकोत्सवदीपिकाचम्पूप्रबन्धम् ऐदम्प्राथम्येन गद्वालशासकः रामभूपालराजकविः स्वीयसाहित्यविद्यामुकुरमुद्राक्षरशालायां शालिवाहनशके 1767 वर्षे (क्रिस्ताब्दे 1845) मुद्रापितवान्।

काव्यारम्भे श्रीचेन्नकेशवदेवं स्तौति कविः। तदनु राजगुरुं पुराणं दीक्षिताचार्यं स्तौति। पश्चात् गद्वालप्रभुं रामभूपालं कीर्तयति। कविसार्वभौम बिरुदाञ्चितः प्रत्यग्रां ऊर्जमासोत्सवसरणिं वर्णयामीति कृष्णकविः काव्यारम्भे उल्लिखति।

गद्वालसंस्थानशासकवंशमूलपुरुषं शोभनाद्रीशं (सोमनाद्रिं) कीर्तयति। तद्वंशावलिमपि कविः उल्लिखति।

गद्वालराजवंशावलिः

शासकः		कालः
सोमनाद्रिः/सोमभूपालः/शोभनाद्रिः	-	1663-1712
कल्लावेङ्कटन्नः	-	1712-1716
रमणय्यः	-	1716-1723
तिम्मक्का	-	1723-1725
लिङ्गम्बा	-	1725-1740

तिरुमलरायः	-	1740-1742
मङ्गम्बा	-	1742-1745
चोक्कम्बा	-	1745-1747
रामरायः	-	1747-1761
सोमभूपालः	-	1761-1794
रामभूपालः	-	1794-1807
सीतारामभूपालः*	-	1807-1810*
वेङ्कटलक्ष्म्यम्बा	-	1840-1840
सोमभूपालः	-	1840-1844
वेङ्कटलक्ष्म्यम्बा* (द्वितीयवारं पालितवती)-		1844-1845
रामभूपालः* (द्वितीयः)	-	1845-1901
सीतारामभूपालः (द्वितीयः)	-	1901-1924
आदिलक्ष्मीदेवम्बा	-	1924-1948

नैजामसंस्थानेन सह गद्वालसंस्थानमपि 1948 तमे वर्षे भारते विलीनमभवत्। कविशरभ-पेदमन्दडिवेङ्कटकृष्णकवि-विरचितात् गद्वालसंस्थानचरित्रमिति ग्रन्थात् सङ्कलितं विवरणमिदम्।

कार्तिकोत्सववर्णनम्

गद्वालवंशावलेः वर्णनोत्तरं रामभूपालस्य पितरौ वेङ्कटलक्ष्म्यम्बा सीतारामभूपालौ स्तुत्वा कविः कार्तिकमासे द्वादश्यां रामभूपालेन क्रियमाणं कोटितुलसीसमर्पणपूर्वकं समर्चनं वर्णयति। तदनु वंशपरम्परया आचर्यमाणः उत्सवः समासन्नः इति उल्लिखति कविः। कार्तिकपूर्णिमायां निजजनन्या वेङ्कट लक्ष्म्यम्बया साकं रामभूपालः कृष्णानद्यामाप्लवादिनियमान् विधाय विष्णुसहस्र नामस्तोत्रं पठित्वा श्रीरामायणपारायणं निशमयन् श्रीमद्रामानुजसिद्धान्त

In Public domain. Digitization Muthulakshmi Research Academy

निर्धारणधुरन्धरश्रीमद्वीरराघववेदान्तयोगीन्द्रगुरुवरसन्निधिं प्रदक्षिणीकृत्य श्रीनिवासदेवदिव्यरथोत्सवं न्यवीक्षत। श्रीचेन्नकेशवमन्दिरं राजा प्रविशति। तत्र हरिदासः भगवद्गुणकीर्तनं करोति। राजा प्रदक्षिणीकृत्य तत्रत्यं दिव्यविमानं प्रणम्य भगवदभिमुखम् उपससर्प। श्रीचेन्नकेशवदिव्यमङ्गलरूपं भक्तिरसोत्कर्ष हेतुभिः ललितललितपदैः चतुर्थे गद्ये कविः वर्णयति।

शास्त्रार्थसभाः

गद्वालसंस्थाने निरुह्यमाणस्य कार्तिकोत्सवस्य अपरं वैशिष्ट्यं नाम शास्त्रार्थसभाः। त्रय्यन्तमीमांसा-पातञ्जल-काणादनय-ज्यौतिषादिशास्त्रपारङ्गताः पण्डिताः कवितारचना-धुरन्धराः कवयः अङ्ग-वङ्ग-कलिङ्ग-मगध-महाराष्ट्र-गौड-मिथिल-कुरु-पाञ्चाल-घूर्जर-कर्णाट-लाट-चोल-पाण्ड्य-तुण्डीर-मुखानेक मण्डलमण्डलात् आगत्य अत्र भागं गृह्णन्ति स्म। स्वमतानुयायिनः परमतानुयायिनः विद्वांसः पक्षपातं विना राज्ञा आद्रियन्ते स्म इति कृष्णकविः विपुलतया कार्तिकोत्सवम् अवर्णयत्।

कोटितुलसीसमर्पणहवनं पूर्णाहुतिरूपेण विरच्यते स्म। सुवर्ण तुलान्तरे जगन्नाथं विधाय हेमभिस्सह समतोलयन्ति स्म अर्चकाः। राज्ये निखिले तोरणानि बध्यन्ते स्म। राजमार्गाः गोमयेन सिच्यन्ते स्म। रङ्गवल्लीभिः अलङ्क्रियन्ते स्म। दीपपाल्यः क्रियन्ते स्म पुरजनैः।

निजकुलदैवतस्य श्रीकेशवस्य चरणयोः निष्काञ्जलिं समर्प्य आचार्य चरणयोरपि रूप्यराशिं समर्प्य राजा कविपण्डितान् पुरस्करोति स्म। कविः अष्टमगद्ये अत्यन्तचारुतया उत्सवस्य वैभवम् अवर्णयत्। उत्सवस्य अपरेद्युः अन्नसत्रम् आयोज्यते स्म। अन्नसत्रस्य वर्णनम् अतीव कुशलतया कृतं

In Public domain. Digitization Muthulakshmi Research Academy

कविना। उत्सवे पुरस्कृताः कविपण्डिताः राजानम् स्तुत्वा आशीर्भिः अनुगृह्णन्ति स्म।

'श्रीकेशवदेवदिव्यानुग्रहेणाभिवर्धतां तव साम्राज्यमित्याद्यत्यादरात्तैः आशास्यमानानि मङ्गलवचनानि अभिनन्दन् कृताञ्जलिर्यथोचितं विसृज्य तांस्तान् प्रीणातु भगवान् श्रीकेशवोनेन कोटितुलसीसमर्पणतुलाभारमहोत्सव वसुवितरणेनेति .....' इति गद्यवर्णनेन उत्सवस्य विशेषाः ज्ञातुं शक्यन्ते। गद्वालसंस्थानस्य सोमनाद्रिशासनकाले(1663-1712) प्रारब्धः कार्तिकोत्सव सम्प्रदायः आदिलक्ष्म्यम्बायाः अन्तिमशासिकायाः(1924-1948) पालन पर्यन्तं प्रचलितः इति मुदावहः विषयः।

कार्तिकोत्सवदीपिकाचम्पूप्रबन्धस्य प्राचीनं मुद्रितं पुस्तकं दत्त्वा कर्तुः कृष्णकवेः जीवनविशेषान् गद्वालसंस्थानराजवंशावलिविशेषान् कृतेश्च छन्दोव्याकरणादि विशेषान् मह्यं बोधयित्वा निस्तुलम् उपकृतवद्भ्यः श्रीमद्भ्यः वैद्यं वेङ्कटेश्वराचार्युलुवर्येभ्यः कार्तज्ञ्यं निवेदयामि। ग्रन्थसम्पादनकर्मणि मामनिशं प्रोत्साहयद्भ्यः संस्कृत अकाडमीनिदेशकेभ्यः प्राचार्येभ्यः के. नीलकण्ठवर्येभ्यः कृतज्ञताञ्जलिं समर्पयामि। शोधकर्मणि सदा साहाय्यम् आचरद्भ्यः मम सहकर्मचारिभ्यः सुब्रह्मण्यसूर्यप्रकाशसन्तोषवर्येभ्यश्च कार्तज्ञ्यं प्रकटयामि।

इति बुधजनविधेया

डॉ. के. वरलक्ष्मीः

उपनिदेशिका, संस्कृतपरिषद्

 In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीमद्गद्वाल श्रीभूचेन्नकेशवाय नमः

श्रीमद्गद्वालनिलयं श्री केशवममुं श्रये ।
यद्भक्तभक्तपादाब्जपांसुर्वितरति श्रियम् ॥१॥

आचार्याख्याप्रतीतो जगति बहुमहापण्डिताध्यापनाद्यः ।
यन्तुष्टोध्यश्वमेधं निखिलमपि महल्लक्ष्मवस्तु प्रदाय ।
आरोप्यान्दोलिकां स्वामवहत जयशिङ्नाम सम्राट् पुराणं ।
कौण्डिन्यः श्रीनिवासाध्वरिमुकुटमणिस्सोऽस्ति कीर्त्याधुनापि ॥२॥

आचार्यः प्रथदीक्षिताभिजनभूश्श्रीशेषविद्वन्मणे
श्शिङ्गम्माख्यसतीमणी च सुषुवे यं श्लाघ्यशीलोज्वलम् ।
योऽधीत्यामलसाहितीं सकवनां वाणाल शेषार्यत
श्श्रीमद्राममपाठयन्नृपमसौ तं दीक्षितार्यश्चिरात् ॥३॥

स्वाद्वानितान्तमतिमृद्वा गिरा विहितसद्वारसंम्मदभरो
विद्वान्महीशविलसद्वारभूमिरुदयद्वादशात्ममहितः ।
सद्वारणान् पुरुददद्वाडभेभ्य उरुमुद्वासवेभसदृशान्
हृद्वारिजस्थ हरिरद्वापरं स्फुरतु गद्वालरामनृपतिः ॥४॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीकेशवाष्टकम्

श्रीः ।। जगतामपि सर्वेषां जन्मस्थित्यन्तहेतवे ।
केवलानन्दरूपाय केशवेन्द्राय मङ्गलम् ।।१।।

इन्दिरायास्स्वात्मवक्षोमन्दिराया महाद्युते ।
केशवेशपरिष्कर्त्रे केशवेन्द्राय मङ्गलम् ।।२।।

क्षमाया अपि मूर्तायाः क्षमायास्सर्वदा भृशम् ।
केलिसंसक्तचित्ताय केशवेन्द्राय मङ्गलम् ।।३।।

हिरण्यकशिपुप्रष्ठमहामातङ्ग संहृतौ ।
केसरिप्रवरायास्तु केशवेन्द्राय मङ्गलम् ।।४।।

ब्रह्मरुद्राद्यगम्याय ब्रध्नमण्डलवर्तिने ।
केसर्यपत्यनुत्याय केशवेन्द्राय मङ्गलम् ।।५।।

वल्लवीतल्लजव्रातपल्लवाय परात्मने
केकिपिञ्च्छावतंसाय केशवेन्द्राय मङ्गलम् ।।६।।

सव्ये पाणौ सचक्राय सहशङ्खाय दक्षिणे ।
केतनस्थिततार्क्ष्याय केशवेन्द्राय मगङ्गलम् ।।७।।

श्रीमम्मष्टिपलीवृद्ध सोमभूपतिना विना ।
केनाप्यसाक्षाद्दृष्टाय केशवेन्द्राय मङ्गलम् ।।८।।

In Public domain. Digitization Muthulakshmi Research Academy

सीतारामनृपालेन तातेनाभ्यर्चिताय मे ।
केतकीप्रमुखैः पुष्पैः केशवेन्द्राय मङ्गलम् ॥९॥

गद्वालरामभूपालः विद्वत्कविजनप्रियः ।
सरसैर्मङ्गलश्लोकैः स्तौति श्री चन्नकेशवम् ॥१०॥

साहित्यविद्योपाध्यायाः पुराणं दीक्षिताह्वयाः
सत्कवीन्द्रा मया नव्यां कृतिमेतामचीकरन् ॥११॥

इति श्री गद्वालरामभूपालरचितम्
श्री केशवमङ्गलाष्टकं सम्पूर्णम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीमद् गद्वाल श्रीभूचेन्नकेशवाय नमः

कार्तिकोत्सवदीपिकाप्रारम्भः

श्रीमन्मङ्गल वेदिमध्यगतयोरंसांससङ्घट्टना
हृष्यद्रोमकदम्बयोस्स्मितरुचिस्फूर्जत्कपोलश्रियोः ।
अन्योन्यप्रहिताहृताय तदशोरव्यक्त शृङ्गारयो
र्लक्ष्मीकेशवयोः कटाक्षसरणिर्वैवाहिकी पातु वः ॥१॥

तत्तादक्षमहादशाननकथाधिक्कार विश्राणन
प्रागल्भ्योल्लसिताखिलाग्र्यसुमनो हर्षालसद्धर्मभाक् ।
उल्लासं दधती सदा मनसि वैदेह्युक्तिकाकर्णने
व्यक्तिस्सावतु रामभूभृदभिधाव्यक्तिं सनामाभिधाम् ॥२॥

केशवमोदकरङ्गद्धालैश्वर्यं सदा दधानाव्यात् ।
लक्ष्मीर्निजसदृशगुणां व्यक्तिं श्रीराम भूमिपालाख्याम् ॥३॥

श्रीवासब्रह्मतन्त्रादिमपद कलिजिद्देशिकेन्द्रानघाङ्घ्रि ।
द्वन्द्वाब्जानुग्रहात्त प्रतिपदविविधग्रन्थनिर्माणशक्तिः ।
श्रीमत्प्रत्यग्र दुर्गास्थितिरिह तनुते सत्वरं कृष्णनामा
प्रत्यग्रामूर्ज मासोत्सव सरणिकथां सार्वभौमः कवीनाम् ॥४॥

In Public domain. Digitization Muthulakshmi Research Academy

अतिमितमतिललिततरं निशमयतां जामिताप्रहाणाय ।
पञ्चषघटिकारचितं ग्रन्थं कवयस्सदाद्रियन्तां मे ।।५।।

प्राचीनाः कृतयो लुठन्ति भुवने नव्याः कृतीर्लालये
त्कोवेति प्रलपन्तु मत्सरहृदो हीनाः कवित्वेन च ।
किं तेषां वचनं त्रयी नवनवान् ग्रन्थानुदारः कवि
र्ग्रश्नात्येव मुदा कलङ्कितहृदस्ते सन्त्वसूयाभरात् ।।६।।

तादृशकविताभावात्सुकवेः कवितां विनिन्दतात्कुकविः ।
निन्दतु कुरूपज़ानिः परवनितां सुन्दरीं क्षतिः काऽस्याः ।।७।।

मृदुलं वा कठिनं वा सरसं चेत्पद्यमादधाति मुदम् ।
रसिकस्याधरदलमिव कुचयुगमपि किं न मोदमावहति ।।८।।

प्राक्तनकृतेर्निशमनादपि दोग्ध्यानन्दमभिनवकृतेश्श्रवणम् ।
मुग्धाया विभ्रम इव न निष्कलाया मुदे विलासो यूनाम् ।।९।।

धृत्वा भूषां परेषां लघुमपि सदृशी न त्वदीया किलास्या ।
इत्यात्तात्मीयभूषं परिहसति यथा दुर्जनस्सज्जनौघम् ।
स्वीयान् श्लोकान् पठन्तं सरसतरगिरं प्राक्तनश्लोक पाठा
त्क प्राचीनं नवं क्केत्यपहसति तथाचेन्न मूर्खस्ततोऽन्यः ।।१०।।

प्राचीनान लधर्मजार्जुनमुखा व्यासादिभिः कीर्तिता
स्तान् प्रत्येव क एष मादृशगिरां यत्नः प्रशस्त्यै भवेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

तद्युक्तं नवराजवर्णनमिदं दुग्धेन गोष्ठेऽप्यलं
कस्सन्तोषयितुं यतेत पयसा दुग्धाब्धिरोधस्थितान् ।११।।

श्रीमन्तः परिपूर्णसद्गुणगणास्सन्त्येव भूमौ नृपा
स्तान्यः कोऽपि च वर्णयेद्यदि कविश्श्रेयस्करःकेचन ।
निन्दन्त्वेनमसूयया नरमयं स्तौतीति तत्रोत्तरं
ना विष्णुःपृथिवीशितेति वचनं तत्स्यात्कथं नृस्तुतिः ।।१२।।
नृपतिस्तुतिकृत्कृतिकुल निन्दनचतुरैस्समत्सरैः कस्मात् ।
यद्यद्विभूतिमदिति श्रीभगवद्वाक्यहेलनं न कृतम् ।।१३।।

स्पष्टं भगवद्गदितं हन्त नराणां नराधिपोऽहमिति ।
तच्चरितवर्णनमपि प्रविनिन्दन्तः कथं नु धीमन्तः ।।१४।।

गिरिं हस्ते धत्तां धरतु धरणिं वापि जलधौ
विधत्तां सेतुं वा हरिरपि विना यत्र कथनम् ।
उदग्रां विख्यातिं जगति न लभेतैव सततं
नमस्तस्यै कुर्मस्सुकविकवितायै निरवधि ।।१५।।

सरसकविवचनपरिमलमभिजानन्ति हि बुधा न जात्वन्ये ।
प्रतिपर्वतशिखरस्थैर्नह्युपलैर्गृह्यते सूची ।।१६।।

अस्ति समस्तगुणाढ्या कुवलयमध्योत्थकर्णिकाकारा ।
अद्भुततरसद्वरा गद्वालाख्या पुरी सुशुभा ।।१७।।

In Public domain. Digitization Muthulakshmi Research Academy

सद्धारोन्नतगोपुराट्टशिखरां गद्धालनाम्नीमिमाम्
बाहाराहुमलीमसीकृतरिपुव्यूहाग्र्यतेजोंशुमान् ।
भूपालावलिगेयरम्यमहिमा गोपायति स्मादरा
द्धीशोभी प्रथमं यशो जनिग्रहं श्रीशोभनाद्रि प्रभुः ॥१८॥

उत्सवशतैधमानस्सानुगतैस्सन्मणिव्रजैरुचिरः ।
श्रीशोभनाद्रिरिति भुवि सार्थयति स्माभिधां स्वकीयां यः ॥१९॥

गद्धालनगरधाम्नः केशवनाम्नो हरेर्महाभूम्नः ।
पदपङ्कजकैङ्कर्यं यदुपज्ञं वर्णयन्ति हि प्राज्ञाः ॥२०॥

तस्मादस्माद्दशोक्तेरविषयमहिमा भुव्यनन्यो वदान्यो
भूपालाच्छोभनाद्रेस्समजनि सुजनश्रेणिमाणिक्यमौलिः ।
हर्षाद्वर्षाणि सोऽयं कतिचन नगरीं रक्षति स्माक्षत श्री
रेनां दीनानुकम्पी तिरुमलधरणीनायको गेयकीर्तिः ॥२१॥

वेदण्डोद्दण्डशुण्डामदहरणमहोच्चण्डदोर्मण्डलोद्य
त्तेजश्चण्डांशुरोचिः प्रसरभरपरिप्लुष्टसर्वारिसैन्यः ।
स्फीतश्रीश्शोभनाद्रेः क्षितिपतिनिवहोत्तंसपादाम्बुजस्य
द्वैतीयीकस्तनूजोऽभवदनघकृति प्रेमवान्रामरायः ॥२२॥

तिरुमलरायदुग्धजलधेरजनिष्ट तत
स्सकल जगन्मनोहरकरप्रसरस्सततम् ।

In Public domain. Digitization Muthulakshmi Research Academy

भुवि कृतलक्षणः परिजुगोप सतां नगरीं
सुचिरतरं प्रसन्नरुचिरः किल सोमनृपः ।।२३।।

तनूजोऽस्य प्रौढस्सरसतर सङ्गीतरचना
महोदारप्रज्ञः कविकुलवचःकेलिसदनम् ।
यशस्वी कन्दर्प प्रतिभटमहारूपमहिमा
जुगोप श्रीरामक्षितिपतिरिमामेव नगरीम् ।।२४।।

तदनन्तरम् ।।

सामन्तावलिशासनैक चतुरक्षेमङ्करप्रक्रिय
स्सीतारामनृपालशेखरमणिः ख्यातात्मदोर्विक्रमः ।
श्रीरामक्षितिपाललब्धविभवस्स्फारानघः श्रीभरः
पुर्यामत्र शशास राष्ट्रमखिलं वीर्याधिकैर्मन्त्रिभिः ।।२५।।

वसन्तदिवसोन्मिषद्धनरसालसालोल्ल ।
सन्मधूलिमधुराः कृतीस्सुकविवर्य सञ्जल्पिताः ।
स्वयन्निशमयन्मुदा सपदि नैजनामाङ्कितास्ततान
बहुमानितान्य इह तान् कवीन्द्रान्नृपः ।।२६।।

सीतारामाभिधक्ष्मापति मकुट मणेर्धर्मपत्नी वदान्या
पातिव्रत्यैकसीमा चतुरतरमती राजनीति प्रगल्भा ।
नित्यं दत्तान्तरङ्गा सुगुणजलनिधेः केशवस्याङ्घ्रिपद्मे
लक्ष्म्यम्बा सर्वविद्वन्निवहनुतयशास्सर्वतोवर्वरीति ।।२७।।

In Public domain. Digitization Muthulakshmi Research Academy

अधुना समेधते श्रीलक्ष्म्यम्बागर्भशुक्तिमौक्तिकराट् ।
श्रीमुष्टिपल्लिसन्तति कलशाब्धीन्दुरिह रामभूपालः ॥२८॥

तामिह पालयति पुरीं गरीयसीं रामभूपतिवरेण्यः ।
तेन पुरी सायोध्याभिख्यां न वहेत कथमिव धरित्र्याम् ॥२९॥

गद्यम् ॥

या खलु निखिललेखकुलमनोविनोदनपटुतरशुभगुणमणिजलधि-लोकेश श्रीकेशवदेवाभिधानमहानीलमणिसुखासिकौपयिकान्तरघनतर-समुद्रकायमान निस्तुलनिस्तलदीप्राकार प्राकारवतंसप्रशंसनीयरूपा, फलभराव-नम्रकदलीक्रमुक नालिकेरपालिकेरितमन्दपवनकन्दलवलन-तरलित बहुलवकुलकुन्दकुटजमन्दारकोविदार कदम्बमुखतरुकदम्ब-निबिडितप्रतीरविपुलवापिका सहस्रान्तराल तरलमृदुलतरतरङ्गजालताल-वृन्तसन्ततपरिशमितरति रभसपरिश्रम श्रमपरिसरनिकुञ्जपुञ्जमञ्जुल भवनविहरमाणरसिकतरुणसमाराधितकुसुमायुधदैवता । नितान्तनिज-नगराधिक वैभवविलोकनाभिलाषसमागतपुरन्दरपुरसुन्दरीबृन्दरीति-भरणनिपुणरमणीजन शरणीकृतरमणीयसुमणीमयविमानसमान-लसमाननूत्नरत्नसौधयूथनिबिडित हृद्यानवद्यनिषद्यातल प्रसारित-शस्तकस्तूरिकादि निस्तुलवस्तुपरिमलपरिमिलन्निष्यन्द पुष्पन्धयधुरन्धर-बृन्दपुरन्दरमणिभ्रमातिशय समारचितोञ्छनानन्तरसरभसस झङ्कारतदुत्पत-नसमयभयचकितमुग्धबालामणीसमाश्वासनचतुररसिक तरुणज-नमनोहरान्तरा निरन्तरमखिलजगतामुन्मीलयत्यमन्दमानन्दम् ॥१॥

In Public domain. Digitization Muthulakshmi Research Academy

काव्यालङ्कृति नाटकादिरचना कूलङ्कषैस्सूरिभि
स्त्रय्यन्त प्रवणैर्निरन्तरतमां शब्दार्थ शास्त्राध्वगैः ।
यां प्राप्य प्रतिवत्सरं सकुतुकं सम्भाविता यन्नृपै
र्मासं वै जननं वदन्ति सकलक्षोणीबुधाः कार्तिकम् ।।३०।।

असङ्ख्यातान्यन्यक्षितिपतिमहास्थानशतका
न्यवन्यां सन्त्येवं विधसुभगगम्भीरनियमैः ।
महोदारैर्भूपैर्मधुरमिह नास्त्यन्यदिति त
न्महाराजास्थानं सततमपि शंसन्ति सुधियः ।।३१।।

यथा रामे भूपे नरधिविभवै रक्षति जग
न्त्यमन्दानानन्दानभजत पुरा कोसलसुता ।
तथा तस्मिन्नुर्वीमवति सुसुखं रामनृपतौ
तदम्बा लक्ष्म्यम्बा भजति नितरां मोदममितम् ।।३२।।

हरिपदपरिचर्यारीति सर्वज्ञचित्तम्
सकलविबुधपालीकीर्त्यमानापदानम् ।
निखिल सुगुणसान्द्रं शोभनाद्रिक्षितीन्द्रम्
कविकुलतिलकायद्वंशकूटस्थमाहुः ।।३३।।

धरणितलं गोपायति तरणिस्फुरणप्रतापजुषि यस्मिन् ।
उद्यानेषु परश्रीमत्सर उदभून्न जात्वपि बुधेषु ।।३४।।

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

संवत्सरेष्वजायत स पराभवता न योधयूधेषु ।
जीर्णवसनेषु जाता पाटच्चररीतिरपि न देशेषु ।।३५।।

द्विरदालसगमनानां सुरदानवसिद्धमर्त्यललनानाम् ।
स्मरदाननिपुणमहिमा शरदागम एकदाविरास तदा ।।३६।।

निजकान्तप्रतिबोधहर्षविवशा निर्बाधनित्योल्लस
न्मिहिरांशुव्रजफुल्ल पङ्कजमहारत्नाढ्य सिंहासने ।
विकसत्पाण्डुरकाश चामरमरुत्सेव्यामराली गलो
द्गलदत्यद्भुततानगानरसिका लक्ष्मीस्तदामोदत ।।३७।।

गद्यम् ।।

समये तस्मिन्विस्मापितनिखिलभुवने स्फूर्जदूर्जस्वलशुभोर्जमा सवलक्षपक्षद्वादश्यां वश्यात्मनामग्रणीरव्यग्रनीतिर्विनीतकुलशिखामणि-शुभव्यापारो रामभूपालोऽसावाचातुर्मास्यमनुदिनप्रवर्तित निजकुलदैवत श्री केशवदेव चरणारुणारविन्दामन्दकोटितुलसी समर्पणपरिपूर्णतावहं निजान्वयशिरोमणि सोमभूपाल प्रमुखमहाराजचूडामणिभिरखिलै रप्यतिनियमेन बहुचिराय निष्प्रत्यूहं प्रवर्त्यमानं महोत्सवं सम्प्राप्तमनुचिन्त्य सरभसमुन्मील्यमानेषु यथाविधि तदीयहोमतर्पणेषु त्रिभुवनक्षेमसमर्पणेषु तैस्तैर्द्विजैरनुदिनमपि सरसतरस्निग्धमृष्टौदन प्रदानपरितोषितेषु द्विजातिजातेषु अतीतेषु च द्वित्रेषु दिनेषूत्सवघनेषून्मिषन्त्यां शुभश्रीकायां राकायां कार्तिक्यां निजदिशां प्रतिसमायास्यतो मित्रधराधिनाथस्य समभ्यर्चनीकृते शतमखेन सज्जीकृते पद्मरागसिंहासन इव समुज्जृम्भमाणे

In Public domain. Digitization Muthulakshmi Research Academy

सान्ध्यरागे मन्देतरवन्दिव्रजसन्दानित सुन्दरतररागावलिभोगावली-कलालापजालवेदितप्रबोधसमयस्समुत्थाय विविधकुरुवकमरुवक-सरसिजकुवलयदरदलितवकुलमुकुलमुखनिखिलकुसुमसर विसरविसर-दसदृशपरिमलघुमघुमितादतिमृदुलादत्यद्भुतादानन्दित जननयनाच्छय-नादुत्थायाग्रतो घनरसमेदुरं मङ्गलसुवर्णकुम्भयुगमिव कन्यायुगं निजमनोऽनुकुर्वन्तमिव विमलतरं मणिमुकुरं च परिजनसञ्जीकृतमन्यानि च मङ्गलद्रव्याणि विलोक्याभिध्याय तमेव कुलदैवतं भगवन्तं श्रीकेशवं सविनयमुपागतैरितरैः परिच्छदैर्विरचितादात्विकोपचारस्सन्ताड्यमानासु प्रस्थानभेरीषु अनन्यसुलभसौशील्यादिगुणगुम्भितसर्वेन्दुसुपर्वद्विपशर्व द्युतिखर्वेतरगर्वाहतिधूर्वह दीप्तिकीर्ति व्रजमुक्तामणिमालिकालङ्कृत-दशदिशां तया शान्तया निजजनन्या वेङ्कटलक्ष्म्यम्बया साकं निर्गत्य शिबिकारूढया स्वयमप्यारूढो जवविजितविहङ्गराजं तुरङ्गराजं सरभसस-मुच्चलदुद्दण्डकेतुदण्डस्यन्दनबृन्ददन्तावलसन्तति गन्धर्व धुरन्धरपादा-तपादाहत्यादारितधरणितलोच्चलितनिबिरीसधूलिपालिधूसरित वासरारम्भस्समतिक्रम्य धनाधिनाथशेखरितायां दिशायां गव्यूतिमात्रं पन्थानं पुरतो बहुलतरतरङ्गसङ्गसङ्घोषबधिरीकृतप्रतीरजनपदजनतायां कलशजलधि राजन्यकन्यकारमण चरणनलिनजनन विरचित निखिलसरिदतिशयाया दिविषत्तटिन्या वैशिष्ट्या सहमानतया तत्साम्यमधिगन्तुं भगवदङ्गसारूप्यमवलम्बमानायामिव निजनामानुरूप-रूपायामुपशमिततृष्णायां कृष्णायां वाहिन्यामवतीर्य निर्वर्तिता-प्लवादिनियमो विधृतोर्ध्वपुण्ड्रोऽभिध्याय भगवन्तं कृतमूलमन्त्रजपो

In Public domain. Digitization Muthulakshmi Research Academy

विरचित गुरुपरम्परा विष्णुसहस्रनाम स्तोत्रानुसन्धानोऽभिनन्द्य पुरोधसा यथामर्यादं विरचितं पूर्वाचार्यग्रथित स्तोत्रपारायणं तदनुचार्धासनाधिरूढेन स्वानुज्ञया श्रीमदाचार्यदीक्षित दिव्यान्वयदुग्धोदन्वच्चिन्तामणिना कविकुललालामेन पुराणं दीक्षिताचार्यवरेण्य निजविद्या गुरुणा करुणावरुणालयेन प्रपञ्चितमतिगभीरललितमर्थं निशमयन्नेव विरचय्य श्रीरामायणपारायणं समुत्थाय कृष्णवेणीतटात्समागत्य श्रीमद्रामानुज-सिद्धान्त निर्धारणधुरन्धरश्रीमद्वीरराघववेदान्तयोगीन्द्रगुरुवरसन्निधिं प्रदक्षिणीकृत्य परिगृह्य विनयावनमितेन मूर्ध्ना तत्प्रसादान्यथापुरं निर्वर्तिताह्निककृत्यया सत्यसन्धया सुगुणमणिखन्या निजजनन्या सह संसेव्य तत्र श्रीनिवासदेवदिव्यरथोत्सवं तुङ्गतुङ्ग शताङ्गमतं गजतुरङ्गपदातिकवचितपार्श्वभागो न्यवीक्षत प्रतिक्षण-सम्भावनार्थ समापतन्नानादेश विचक्षणसलक्षणां सद्वालधितुरगसद्वारण-लसद्वारतलां गद्वालपुरीम् ॥२॥

आद्यात्केचिदनन्तरात्कतिपये द्वारान्निवृत्तास्तदा
केचित्तुङ्ग तुरङ्गपुङ्गवगता योधास्तृतीयादपि ।
तुर्यात्केचन पञ्चमात्कतिपये तां सम्प्रविष्टे पुरीं
स्फूर्जत्काहलनाद माश्वधयथामर्यादमुर्वीपतौ ॥३८॥

देवानामपि विस्मयप्रदमहावाद्याहति प्रोद्गल
ज्झाञ्झाङ्कार निमीलिताहिपति दृक्साहस्रकास्सैनिकाः ।
श्रेणीभूय गताः क्षणं कृतपृथग्यानाः क्षणं मण्डली
भूतास्तत्क्षणमुच्चकैरनिमिषांश्चित्रं वितेनुर्नरान् ॥३९॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ।।

तदनु प्रविश्य मितेन परिवारेणान्तःप्रवेशोचितेन विभूषितां गोविचित्ररत्न प्रत्युप्तैर्विभूषणैस्साकं लक्ष्म्यम्बया निर्गत्य प्रतिहारमध्या-श्रिरन्तरसमेधमान साम्राज्यलक्ष्मिकटाक्षवीक्षण मरीचिनिचयेनेव युगपदहमहमिकया पुञ्जायमानेन सचन्द्रक पिञ्छातपत्रेण सञ्छादितो-परिभागः राजहंसोऽयमिति गौरवेण सेवमानाभ्यामिवात्मानं हंसाभ्यां चामराभ्यामभिवीज्यमानोऽसावभिमुखमागत्य स विभ्रमोदञ्चिताञ्जलि प्रणम्य सभावमन्दस्मित सुन्दरवदनेन्दुमण्डलं गच्छन्तीभिर्वारकान्ताभिः परिष्कृत पुरोभागस्सविनयभृत्यवर्गविद्यमान सावधान पादविन्यासोऽ-त्युच्चैः पठ्यमानासु भोगावलीष्वनर्घ बिरुदगुम्भितासु वन्दिबृन्दैरभि-ताड्यमानेषु भेरीपटहपणवाद्येषु वाद्येषु पाणिघैः परिपूरिते च मङ्गलशब्दैरखिलदिशाभोगे समुपसृत्य महाप्रदक्षिणपूर्वकं भगवन्मन्दिर प्रतिहारभुवं यथामर्यादं पार्श्वतोऽपसृत्य तिष्ठत्सु तत्रैवच्छत्रचामर-ग्राहिष्वन्तः प्रविश्य तावद्यथासमयमुपतिष्ठमानेन हरिदासेन सुस्वरमग्रतो गीयमानं वीणापाणिना भगवद्गुणकीर्तनं निशमयन् प्रति प्रदक्षिणमप्ये-कदेशबद्धस्वस्तिकवन्दिवरोच्चैः पठ्यमानं भगवन्नाममयं पद्यं श्रावंश्रावं प्रदक्षिणीकृत्य चतुर्विंशतिकृत्वो भगवदा लयशुक्तिमुक्ताफलायमानं दिव्यविमानं प्रणम्य द्वादशवारं तावद्यथाप्रदेशं बद्ध स्वस्तिकेषु निष्पन्ददेहेषु निश्चललोचनेषु निश्शब्देषु तिष्ठत्सु सर्वेषु श्रेणीभूय जनेषु भगवदभिमुखं मन्दंमन्दमुपससर्प ।।३।।

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

अथ तत्र महेन्द्रनीलमणिमिव कनकमयसमुद्गकान्तरं महामिलिन्द-मिव मानससरस्सहस्रपत्रकोशमध्यं स्मेरासितधाराधरवाराधिकराराजित-भाराजिपरा भूतिविचाराद्भुतदोराहवर्धीरैर्निजतेजः पूरैर्दिव्यहैमविमानाभ्यन्तरं समं ततः प्रकाशयन्तं सादरमात्मनो विष्णुपदाश्रितत्वं सूचयितुमुपागते दिनकरमण्डल इव पीठीभूते चिरत्नरत्न प्रत्युप्तसुवर्णसहस्रपत्रे विन्यस्ताभ्यां कालोन्मीलित तामर समदहरणाभ्यां चरणाभ्यां पञ्चबाणविजय-काहलीभ्यामिव जङ्घाभ्यां च विभ्राजितं अतिशुचितरदुकूलपरिवृततया रम्भास्तम्भ श्रियमपहसद्भ्यामिवोरुभ्यां चकासतं अदसीयचरणनलिन-जाता खलु ममैका सखी अन्या त्वत्रैव प्रवहतीति रोमावल्यां कलिन्द-नन्दिनीधिया स्वयमपि परिरम्भमाणा सरस्वतीयमिति भ्रान्तिमापादयन्त्या पीताम्बरवल्ल्या परिकलितसंव्यानकृत्यं कौस्तुभदिवाकरं ग्रसितुं मध्यमगगनमध्यतलादुत्सर्पता स्वर्भानुनेव रोमरेखाङ्कुरेण परिस्फुरदुदर-थलंथलथलधनुपममहानायक दिननायक किरणावलीभिरिव समुत्सर्पन्तीभिरसदृशमणिमालिकाभिः कमलालयानिवासवक्षोमण्डपा-लङ्कर्माणलीलामणिगुच्छेनेव कौस्तुभेन परिष्कृतं तत्तद्विनताखिलजनता-भयदानपृथक्पृथक्प्राप्तयशःखण्डैरिव उत निजाधिकतेजसो नखरनिकरा-न्विजेतुं श्रेणीभूय परिवेष्टयन्तीभिरिव तारकाभिर्वज्ररेखाभिरभितः प्रत्युप्तेन दिव्यवलयेन विभासुराभयहस्तं निखिल निशाचरोन्मूलन-दृढतरपरिघ प्रकाण्डेनेवाजानुलम्बिना वामभुजदण्डेन कौमोदकीमलङ्कुर्वाणं सर्वदापि वामभागस्थितिजनितावमानशिशमयिषयेव आहोस्विद्दुग्धाब्धि-कन्यकाकन्धरामनुकरोत्ययमिति बहुमिमानयिषयेव पाञ्चजन्यं दक्षिणेन

In Public domain. Digitization Muthulakshmi Research Academy

करेण तदितरेण च सुदर्शनं विभूषयन्तं शरणागतभरणसानुरागतया समुल्लङ्घित वेलान्तस्थितकरुणादुग्धवरुणालय तरङ्गेणेव मन्दस्मितेन सुन्दरेणापाटलाधररुचिबालातपस्मेरेण दिव्यमुखाम्बुजेनानन्दयन्तं निखिलभुवनं रुचिरसरसिरुहमरीचिनिच यमदमोचनाभ्यां लोचनाभ्यां दिव्यमुखचन्द्रमण्डलसिषेविषया निकटभुवमुपागतेन रोहिणीतारेणेव अधरप्रभापाटलेन नासामौक्तिकेन मनोहरं वदनकमलमरन्दपिपासया चिकुरमधुकरनिकरावतीर्णेन मधुकरशाबेनेव मृगमदतिलकेन चोल्लसित-फालफलकं निजान्तेवासिनः प्रत्यात्मानं दयालुङ्कारयितुं समाश्रयता शुक्रेणेव वज्रललन्ती मणिना देदीप्यमानमञ्जनाचलमिव सन्ध्याम्बुदेन घनाघनमिव भानुमता रत्नमकुटेनविभासुरं निखिलगुरुवरसमाराधित-वैभवमखिल दिव्यस्थललक्ष्मीनिवाससङ्केतभूमिं भगवन्तं राकेन्दुवदनं लोकेशं श्री केशवमाचरणमकुटाग्रं विलोक्याभिनन्द्यासेव्यानितरसुकरैरुप चारैश्चामरवीज-नदीपारोपणाद्यैः सम्मान्य शिरसा भगवत्प्रसादादिकं प्रणम्य मुहुर्मुहुः किञ्चिदन्तरं कृतापसर्पणो मन्दंमन्दं प्रतिहारभुवि क्षणं निषसाद ॥४॥

अथ सरभसमुत्तिष्ठति राजनि सर्वे सवेगमुदतिष्ठन् ।
उदयति सहस्रकिरणे विकसत्पद्मच्छदा युगपदिव ते ॥४०॥

गद्यम् ॥

अथ तत्र विचित्रशतपत्रमित्ररुचिमित्रमणिगणखचितान्तरं तत्रतत्र व्यालम्बमानेषु मणिगुच्छेषु परिपक्वदाडिमफलभ्रमेण समागताभिश्शुक-श्रेणीभिरिव हरिततररसालपत्रतोरणावलीभिरुल्लसितमङ्गलं यथाविधि

Digitization Muthulakshmi Research Academy

यजन ऋत्विक्कुलसमारब्धकोटितुलसीसमर्पणहवनाज्याहुति गन्धसुरभित-
दिगन्तरं यजनवेदितट प्राङ्मुखोपवेशितकेशवदेव दिव्यसौन्दर्यसन्दर्शन-
मन्दितपक्ष्मपरिस्पन्दन जनबृन्दसुन्दरमतिहृद्यगद्य पद्यरचना धुरन्धरकवि-
पुरन्दरबन्धुरं प्रविश्य भगवत्सन्निधि पुरोमण्डपं तत्र च कांश्चिदारब्दत्रय्यन्त-
मीमांसा पातञ्जल काणादनयपूर्वपक्षान् कांश्चनान्तरान्तरा विषय
शोधनादुर्ललितान् कांश्चन यथाक्रममारभ्यमाणानुवादान् कांश्चन
मयोच्यते मयोच्यत इति दूरादुत्थायोत्थाय हरिणप्लुतेनोत्प्लुत्याग्रत-
स्समागत्य निषण्णान् कांश्चन नहि नहि तथेति तमनुवादमनङ्गीकुर्वाणान्
कांश्चन श्रूयतां श्रूयतामिति तमेवार्थमभिधातुमारभमाणान् कांश्चन
तत्रान्तर एव न तथा न तथेति सङ्घीभूय प्रचुरित कोलाहलान्
एतस्मिन्नेवान्तरे किमेवं मुधाकोलाहलविजृम्भितेन क्रियतां सावधान-
मनुवाद इति समादधत्स्वेव केषुचिच्चिराभ्यस्तशास्त्रार्थविचारबहुतरो-
त्कण्ठतयाहमहमिकया कमपि कलकलं पुनस्तरामारभमाणानन्यांस्ताव-
देवास्यतामास्यतां श्रुत्वैतमनुवादं यथोचितं समाधीयतां पूर्वपक्षो
भवद्भिरागतो वा न वायं विषय उच्यतामित ऊर्ध्वमित्युद्धृत्य बाहुं
समादधानेषु तेषु तेषु मुख्येषु विद्वदग्रगण्येष्वेवमयं सिद्धान्त इति
प्रकाशित सन्दष्टदशनं हा तथेति कम्पितभ्रूलतमुन्नर्तितात्पतरशिखं
प्रसारितमध्यमातर्जनीक माकुञ्चिताङ्गुष्ठानामिकाकनिष्ठिकं करमुद्वेल्ल्यो-
द्वेल्ल्य निर्धारयतस्तांस्तान् शास्त्रार्थान् कांश्चन उत्तरोत्तरयुक्तिसमर्थ-
नाशक्ततया स्तम्भितवाचस्स्विन्नमुखान् कातर्यावेगशुष्करदनवसन
प्रमार्जनासक्तरसनाग्रान् कांश्चन विलोक्यतानेतानपहसतः कांश्चन
पश्चात्पश्चादेवमेषा वाक्यार्थशैलीति त्रिवलितमुखं सज्ञानमुद्रकरं

In Public domain. Digitization Muthulakshmi Research Academy

स्वस्ववर्गीणान् कर्णे कर्णे बोधयतः एवमेतन्नैवमेतदेवं चैतदेवेति परस्परोक्तानि खण्डयतो विजिगीषैकायत्तचित्तानन्नालोचितान्यविचारान् विलोक्य तांस्तान्विद्यापारगान् सशिष्यनिवहान् सङ्भावतो विरचिताञ्जलिस्तानभिनन्दयन् सस्मितैस्सादरैर्भावगर्भैरनेकार्थप्रकाशकतया सूत्रप्रायैर्मधुररचनैर्वचनैः कृताञ्जलिर्भगवदभिमुखो निषसाद सर्वा जनता च यथाक्रमं पङ्क्तिशः पश्यतां च चित्तेष्वमन्द आनन्दः ॥५॥

सफलानारचयास्मन्मनोरथ भरानितीव सूचयितुम्
रचितानि मनीषिजनैस्सफलान्याशीर्वचांस्यधो जगृहे ॥४१॥

तदानीं ॥

कोटितुलसीसमर्पणहवनं पूर्णाहुतौ विरचितायाम् ।
पूर्णं न परं विदुषां समागतानामभीष्टमपि ॥४२॥

सकलजगतां नाथं देवं सुवर्णतुलान्तरे
विनयमधुरा विन्यस्यारादुदारगुणाकरम् ।
तदनु बहुशो रामक्षोणीश्वरार्पित हेमभि
स्सहपरिजनाश्शुद्धाचारा मुदा समतोलयन् ॥४३॥

तुल्यं यस्य त्रिजगति नैवायं केशवोऽपि कनकेन ।
तुल्योऽभूत्किं ब्रूमस्तेऽमी कनकस्य हन्त महिमानम् ॥४४॥

अधिरुह्य तुलां स हरिस्सर्वोच्च श्रीर्गुरुर्बभौ चित्रम् ।
युक्तं तत्रैव जनो मन्दं तपनीयमुच्चमद्राक्षीत् ॥४५॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वार्पितसुवर्णभारैस्तुलितं देवं निरीक्षमाणोऽथ ।
राजा सदालिमध्येऽत्युच्चश्री राजते स्म चित्रमिदम् ।।४६।।

अथ ।।

सरसवचनपरिमलविवशीकृतरसिक चेतसश्चतुराः ।
मधुरोदारगभीरैः पद्यैः कवयोऽभितुष्टुवुर्भूपम् ।।४७।।

तत्र कश्चित्कर्णाटदेशादागतः कविसार्वभौमोऽग्रे रामभूपालमुद्दिश्य।।

ब्रह्माण्डा निवसन्ति यस्य जठरे रत्नानि सिन्धाविव
ब्रह्माद्यैरपिदैवतैस्तुलयितुं नो जातु यश्शक्यते ।
रामक्ष्मावरकेशवस्तुलयितुं हेम्ना त्वया शक्यते
सोऽपीदृक्चरितानि सर्वजगतां दद्युः कथं नाद्भुतम् ।।४८।।

मा कुप्य क्षणमात्रमत्र भवतां तत्तादृशांस्त्वद्गुणान्
श्रीगद्वालनरेन्द्रधीर तनुमः कर्णावतंसान्मुदा ।
नित्यं संस्तुतपूर्वतामुपगतोऽप्येष त्वमेषां नृणां
धत्से तादृशसद्गुणैर्नवनवां रीतिं वदान्याग्रणीः ।।४९।।

कवीन्द्राणां यद्वत्सरसवचनैः ख्यातिमयसे
वचोभिर्नान्येषां क्वचिदपि तथा रामनृपते ।
ह्रदो रम्यां ख्यातिं प्रभजति यथा सारसरवै
स्तथा मण्डूकानां कठिनरटनैर्न क्वचिदपि ।।५०।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रदत्तेऽप्यस्मभ्यं बहुमतिभरे रामनृपते
तव श्रीमन् स्याद्वा क्षतिरिति कथा वापि कयिती ।
वितीर्णेऽप्यभ्रेभ्यस्सततमपि तोये क्षितितल
स्थितानां नाथस्य प्रचुरसरितां का क्षतिरिह ।।५१।।

तत्तादृक्कवितावशीकृतजगत्यस्मिन् कवीनां व्रजे
दत्तं वस्तु यशस्समुल्लसनदं ज्ञेयं समस्तादपि ।
मेघो वर्षति सर्वतोऽम्बुजलधेश्शुक्तौ यथामौक्तिकं
स्यादन्यत्र तथा भवेत्किमु वद श्रीरामभूमीपते ।।५२।।

मदगरिमगारिधनिदमदम पदसदगाद धामदाम दध
जयरामनृपेति सदा प्रतिदिशमिह वैणिकास्तुवन्ति त्वाम् ।।५३।।

ऊर्जेमास्यत्र लब्ध्वा बहुमतिमनघां रामभूपान्निवृत्तान्
स्फारैहरि रुदारैर्मणिमयकटकै राङ्कवैर्भूषिताङ्गान् ।
पुत्रान् भर्तॄन् सगर्भ्यानपि निजभवने बन्धुवर्गस्स्वकीयः ।
के यूयं कुत्र याताः क्व पुनरिह गतिश्चेति पृच्छन्ति चित्रम् ।।५४।।

वितनोषि किल श्रीमन् काञ्चनमयराङ्कवाग्रसरदान ।
श्रीरामभूपतिमणे निजनाम कथं न सार्थयसे ।।५५।।

जगति निखिलैर्भूपालेन्द्रैश्चिरादपि मानितस्तव
सदसि यो मान्यो मान्यस्स एव कृती भवेत् ।

CC-0. Digital Humanities Digitization Muthulakshmi Research Academy

शिरसि विधृतोऽप्यल्पैर्मर्त्यैस्तथा न हि शोभते
त्वदुरसि धृतो रामक्ष्मापालवर्य यथा मणिः ॥५६॥

मितोऽप्यालापस्ते विवशयति यद्वत्सहृदयां
स्तथा नैवान्येषां क्वचिदपि नृपाणां बहुरपि ।
यथाऽल्पोप्यानन्दं रचयति रवः कोकिल शिशो
स्तथा रामक्षि ... विपुलं काकरटनम् ॥५७॥

आचार्यास्सभिका नितान्तसुहृदो ये चान्यपृथ्वीभुजां
तेऽमी रामनृपाल शेखरमणे त्वामर्थयन्तेऽनिशम् ।
ये तु त्वद्भुजकल्पभूरुहघनच्छायाश्रितास्सूरयो
वीक्षन्ते न सुरेन्द्रमप्यथ कथं पश्यन्ति तेऽन्यान्नृपान् ॥५८॥

स्मितश्रीस्ते यावच्छ्रियमिह कवीनां वितनुते
न तावत्सम्पत्तिं परधरणिपाला दृतिशतम् ।
यथा धत्ते ज्योत्स्ना ननु कुवलयामोदलहरीम्
तथा खद्योतानां न शतमपि रामक्षितिपते ॥५९॥

यं त्वद्दृष्टिसखी पुरस्कृतिवशाल्लक्ष्मीस्समालिङ्गति
श्श्रीरामक्षितिपालसन्त्यजति तं ज्येष्ठा रुषेव क्षणात् ।
प्रायस्त्वं प्रियमन्यया महिलयाश्लिष्टं सदा नूत्नया
ज्येष्ठा नैव सहेत सोऽपि ललनां नैवाद्रियेतादिमाम् ॥६०॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीराम क्षितिपालशेखरमणे गाम्भीर्यतस्संश्रित
व्यूहेष्वप्रकटीकृताति करुणश्चित्तं विधुन्वन्नृणाम् ।
प्राङ्मन्थानधराधरेन्द्रमथनादव्यक्तदिव्यामृतम्
दुग्धोदन्वदधीश्वरं तुलयसे सत्वं वदान्याग्रणीः ।।६१।।

अन्यच्च ।।

कार्येणोह्यं गूढं वात्सल्यं रामभूमिपाल तव ।
ऐन्दवबिम्बमिव प्राग्दिङ्मुखधावल्यतो जलधि गूढम् ।।६२।।

उदार श्रीरामप्रभुवर कवीन्द्रैरनुपदं
सहिष्णुः पृथ्वीवत्वमिति वितथं गीयस इह ।
परेषामुत्कर्षं बत न सहसे जातुचिदपि
क्षणं वा यद्दैन्यं श्रितविबुधबृन्दे न सहसे ।।६३।।

गुणानां मीमांसां तव न तनवै किं मम तया
त्वया वा श्रीरामप्रभुतिलकसाध्यं ननु किमु ।
य एष क्षेमाणि प्रथयति महार्घाणि सुचिरा
दमुष्मैत्वद्दोष्णे सततमपि च स्वस्ति तनवै ।।६४।।

श्रीमद्वैष्णवसार्वभौमयतिराडङ्घ्रिद्वये ते मनो
वाक्ते मध्वहिता स्मितं रचयति स्मार्तव्रजो ... ।
तद्वैषम्यलवं विहाय विबुधांस्तत्तन्मतस्थान्यथा
योग्यं मानयसे वदान्यचतुरश्रीरामभूमीपते ।।६५।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitization Muthulakshmi Research Academy

औदार्याद्भवतस्तुलामतितरामारोढुकामो महान्
पाथोदश्शरणङ्गतो हरिपदं तत्राप्यलब्धेप्सितः ।
क्रन्दत्यार्ततरं सदातिचपलः प्राप्यातिमालीमसी
मिष्टार्थः क्व भवेत्सदाशनिजनिस्थानस्य रामप्रभो ॥६६॥

राजाऽसि न लोपस्त्वयि युक्तं जागर्ति दीर्घमैत्री च ।
सुप्रत्यये परं तल्लोपो नेत्यद्भुतं हि रामविभो ॥६७॥

प्रौढिस्तव समा श्रीमन्नामभूपालशेखर ।
हितानामहितानाञ्च सौराजन्यभयङ्करा ॥६८॥

भवान्निष्कपटो दाता वयं निष्कपटार्थिनः ।
महोदार तनोष्यस्मान्नामभूपनिजोपमान् ॥६९॥

रिपुपङ्क्तिकण्ठदलनो युक्तं श्रीरामभूपनामासि ।
परशुभवच्छ्रीरम्यस्त्वमिति विचित्रं वदान्यमणे ॥७०॥

त्वद्दत्तं दुर्वर्णं प्रतिगृह्णन्तोऽपि रामभूपाल ।
अर्थिसमूहाश्चित्रं दुर्वर्णं तत्यजुश्चिरात्प्राप्तम् ॥७१॥

अनुक्त्वैवं कुर्यामिति रचयसे संश्रितहितम्
महोदार क्वास्ते भुवि तव समो रामनृपते ।
स्तुमः कांस्कान्रम्यांस्तव शुभगुणानल्पवचसो
वयं धूतायासास्तव वदनचन्द्रस्य कलनात् ॥७२॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ।।

इति कविकुलतिलककलितसरसतर पद्यशतनिबद्ध मुग्धतरार्थ सन्दर्भनिशमन विवशीकृतान्तरङ्गः यथोचितं सम्मान्य तांस्तान्निर्वर्ण्य च भगवतः कोटि तुलसीसमर्पणोत्सव पूर्णाहुतिं विसृज्य यथामर्याद-मार्यान् कृतिवर्यान् प्रविश्य निजमन्दिरं विरचय्य निखिलमपि तात्कालिककृत्यमत्यन्तसन्तोष सन्ततिदन्तुरितान्तरङ्गस्तुङ्गतरास्त गिरिशृङ्गसङ्गतेव रङ्गमण्डले निजप्रार्थनया भगवति लोकेशे श्रीकेशवे महता दिव्योत्सवेन मूलनगरं दक्षिणेन समेधमानाम् अखिलशुभा-वष्किरणीं पुष्करणीमलङ्कुर्वति सर्वतोऽपि निरङ्कुशमारोपिता सुदीपरेखा-स्वानन्दितरेखा सुसन्निधौ भगवतो गृहीतमहा रजतदण्डश्शुण्डादण्ड गृहीतकदलीकाण्ड इव वेदण्डशिशुश्च चारतत्कैङ्कर्य रचना कुतूहल-व्यग्रचित्तोऽप्रमत्तः क्षणं परितः ।।६।।

निजवल्लभाय हरये मणिखचित प्रान्तदर्पणी विमला ।
विरराज वसुन्धरयार्पितेन सा दीपपरिवृता वापी ।।७३।।

गद्यम् ।।

तदनु निजतेजः प्राग्भारविजिततया सङ्कुचितात्मना सेवार्थमुपागतेन दिवाकरेणेव कर्पूरदीपेन कृतनीराजने महता वैभवेन विरचितनिखि-लोपचारे प्रविष्टे च दिव्य विमानमसमानं रमाकान्ते क्षमाकान्तोऽपि प्रविश्य निजनिशान्तमनन्तमनुबभूव प्रमोदमतिवाहयामास चैवमेव द्वित्राननुक्षण तत्तद्देशनिरर्गलाहम्पूर्विका समापतदसङ्ख्यात भूसुरधूसर-न्वासरान् ।।७।।

 Digitization Muthulakshmi Research Academy

तदनन्तरम् ।।

बध्यन्तां तोरणाल्यस्सरसिजनिचयैस्सिच्यतां राजमार्गः
कल्प्यन्तां रङ्गवल्ल्यो निखिलपुरजनैर्दीपपाल्यः क्रियन्ताम् ।
आहूयन्तां च तत्तद्विषयकृतिगणा रामभूपालमौलि
र्दत्ते वित्तं यथार्हं भृशमिति सचिवास्सन्दिशन्ति स्म तांस्तान् ।।७४।।

गद्यम् ।।

इत्याज्ञाप्य विज्ञानिचूडामणिषु जागरूकेषु सचिववरेषु समीप-मुपसर्पत्सु पुरस्कृत्य निजाश्रितविद्वत्कविवर्यानाधिकारिकनिवहांश्च समुपेत्य भगवतो निजकुलदैवतस्य श्रीकेशवस्य दिव्यसन्निधिं संसेव्य नीराज्यमानं कर्पूरारात्रिकया समर्प्य प्रथमं तदीयचरणनलिनयोर्निष्काञ्जलिं श्रीमन्निजा-चार्यवर्यचरणारविन्दे अपि सम्भाव्य रूप्यराशिभिस्समधिरुह्य शिबिकां सम्प्राप्य समुल्लसद्धारणं पुरवरतोरणं मानयत्ययमस्मत्सनामा राजा भूरिवितरणेनास्मत्सनाम्नः कलानिधीन् द्विजराजान्मह्यमपि किञ्चिद्दद्यादेवेति द्विजराजनामधारणचापलादिवारुह्योदयाद्रिं करान् प्रसारयति मन्दं मन्दं चन्द्रमसि सान्द्रतेजसि सर्वतो निबद्धविमलतरमुकुर-तलप्रतिबिम्बित-निजाकृतिविलोकनजातसजातिसंशयशुककुलारब्ध-चाटूक्ति श्रवणपरवश परिजनमेदुरे अभितो विकीर्णमल्लीमतल्लीमुख निखिलकुसुम विसरविसरदसम परिमलसुरभिलेमन्दराद्रिविक्षुब्धदुग्धाब्धि मध्यान्तरङ्गतरङ्गगर्वाहति धूर्वहेवोपर्युपरि समुज्रृम्भमाणेन निजकीर्ति-कदम्बेनेव विशदतरवसनवितानेनालङ्कृते कणचरण फणिवरफणिति-निगमशिखरतन्त्रमुखतन्त्र नियन्त्रित स्वान्तैर्दान्तैर्मनीषिमण्डलैर्नक्षत्र-

In Public domain. Digitization Muthulakshmi Research Academy

मण्डलैरिवालङ्कृते निषेदिवानुदयाचलशृङ्ग इव प्रतिहार सव्यभागकुट्टिमे चन्द्रमा इव सान्द्रमालीमसीं जनानामपनयन्नुत्तराभिमुखो भगवत्तुलाभार-रूप्याणि विन्यस्याग्रत आश्रितरक्षणविचक्षणत्वादकृशानुभावोऽयं भूपाल आश्रयाशत्वात्कृशानुभावेभ्योऽस्मत्तोऽप्यधिक एवेति सशिरःकम्पं श्लाघमानेष्विव पवमानतरलशिखेषूभयोरपि पार्श्वयोः पङ्क्तीभूय जाज्वल्यमानेषु प्रदीपेषु प्रसङ्गमुत्तरङ्गितवतः फण्यग्रगण्यवाण्यभिज्ञस्यास्य इयन्ति रूप्याणि निगमान्त चिन्तासन्तत दन्तुरितान्तरङ्गस्य इयन्ति तर्कातर्किकर्कशमतेरमुष्येयन्ति मीमांसा मांसलमनीषस्यैतस्येयन्ति छन्दस्सन्दोहतुन्दिलस्याप्येयन्ति दिवाकरसिद्धान्तबद्धान्तःकरणस्येयन्ति शिक्षाविचारशीक्षितमतेरमुष्येयन्ति साङ्गसनातनसरस्वतीसरणि परिणत-कौशलस्यास्येयन्ति अतिहृद्यगद्योल्लसत्पद्यसद्ग्रन्थ बन्धानुबन्धधुरन्धर-स्यामुष्येयन्ति इयन्त्यमुष्मा इयन्ति तस्मै प्राग्दत्तान्यधुना पुनर्महाराजेन किमधिकं वितीर्यतेवेति निर्दिश्य निर्दिश्य पठत्सु लिखत्सु लेखाम्पत्रिका-लेखनीव्यग्रहस्तेषु शस्तेष्वाधिकारिकजनेषु अहरत्स्वनुपदमपि सहस्रं सहस्रं रूप्याणि लाक्षामुद्रिकाभिरामवसन प्रसेविकान्तरापूरितानि पूर्वमेव कोशागारान्नैष्किकेषु विंशति त्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्य-शीतिनवतिशतसङ्ख्याकानि रूप्याणि यथार्हं सस्मितमाहूयाहूय सोपचार वचनमविलम्बितं सताम्बूलं समर्यादं सकौतुकं सर्वतो मनीषिमण्डलाय प्रदद्य सद्य एवान्यत्र तदात्वविजृम्भित निजवितीर्यमाण धननिचयजि-घृक्षया पुरतो महासम्मर्दभिया पिधाय गोपुरकवाटयुगलमन्तरान्तरा उद्घाट्य सहस्रं सहस्रमन्तः प्रवेशयन्तं विप्रान्यथार्हं पुनश्च पिदधानं

In Public domain. Digitization Muthulakshmi Research Academy

भृत्यनिवहमत्यर्थ सम्बाधदुस्थं विधायाहमहमिकया समापतद्भ्यः अन्योन्यसम्मर्दजायासमगणयद्भ्यः प्रतिपदं स्खलद्भ्योऽप्युत्साहदत्त-हस्तावलम्बतया पुनरुत्पतद्भ्यः परितस्थितान् बाहुभिरपसारयद्भ्यः दृढतरं कटितटीषूत्तरीयाणि घटयद्भ्यः दाष्ट्यं वहद्भ्यः परस्परसङ्घर्षण-पाटितोत्तरा सङ्गाच्चलेभ्यः अयमेव साहसस्यावसरः किमिति पदं पश्चान्निधीयते दास्यति महाराजो यथेष्टं विलोकयामस्तावदमुष्य रामभूपालमणेरौदार्यवीरतामित्यादि बहुविधं घुष्यद्भ्यो निकटभुवमुपेत्य हरिःओं ब्रह्मसन्धत्तमित्यारभ्य तदन्तर एवातिक्रान्तो भवेदुत्सवसमय इति मनसिकृत्य महाराज शृणु मदीयवाक्यानि विचार्यतां मदीययोग्यतेत्यभिधाय तन्मेजिन्वतमिति परिपूर्य तद्वाक्यं पुनस्तरां राजेन्द्रयोग्यतानुरूपं निरूपय मम रूप्याणीत्युदीरयद्भ्यः तत्रान्तरे कालातिक्रमकुपितभृत्यवर्गपरिगृहीतहस्तेभ्यः मा कुरुत मा कुरुत त्वरां श्रूयतां महाराजेन मद्वचः किञ्चिदिति समाधाय पुनः पुनरुपरि वाक्यानि पठद्भ्यः प्रसार्यते चेत्करोऽस्माभिर्यत्किञ्चिद्दद्यादयमिति मनसि निधायातिप्रयत्नेनापि करा न प्रसारयद्भ्यः कथञ्चित्प्रसारितेष्वपि भृत्यैः करेषु दृढतरमुष्टिममुञ्चद्भ्यः तैरेव दासैरमोचितास्वप्यङ्गुलीषु कथञ्चन हा भग्ना हा भग्ना अङ्गुलयो दुरात्मभिरेतैर्भृत्यैर्हा हतास्म इति कलकलेन पुनर्निकुञ्चयद्भ्यस्ताः न हि मया गृह्यते रूप्यपञ्चकं परारिवत्सरे समागतोऽहं दत्तानि तदा मे वसुसङ्ख्याकानि रूप्याणि किम्पुनरिदानीं प्रातिपदिकार्थ-परिमितानि दीयन्ते विचार्यतां लेखायामस्ति लिखितमस्मन्नामेति ब्रुवद्भ्यः किं वैदुष्यं तवास्ति तावन्ति रूप्याणि

 In Public domain. Digitization Muthulakshmi Research Academy

ग्रहीतुमिति पृच्छत्सु परीक्षकेषु किमस्ति वा कुतो वितीर्णं वा तदानीं किं परीक्ष्य दापितं वा दीयते यदि पूर्वलेखानुरूपं गृह्यतेऽस्माभिर्न यदि नेष्यत इत्यारोपयद्भ्यस्सभ्येष्वेव दोषान् तत्रान्तरे गम्यतां गम्यतां गृह्यतां गृह्यतामिति गृह्णत्सूभयतो भुजान् भटेष्वेतैर्विद्वद्भिर्ज्ञातचरा वयं किमिति तूष्णीमीक्षध्वे मनीषिवर्याः मयाप्येकः पूर्वपक्षस्तरङ्गित इति जल्पद्भ्यः तावदेवातिमौर्ख्यकुपितैर्भृत्यैर्धनुर्दशकमात्रं नीयमानेभ्यस्तिष्ठ तिष्ठ किं तव न्यूनमिति प्रणिगदद्भ्यः किं त्वयाभ्यस्तं पठ किमपि वेति पृच्छत्सु कारणिकेषु न कापि योग्यता मम दूरादागतोऽहं दुर्गतः प्रदुरा खलु तव दिक्षु कीर्तिरधिकं दीयतामिति वदद्भ्यः अग्रतस्समागत्य तूष्णीं स्थाणुवत्तिष्ठद्भ्यः विवृणु किञ्चिदास्यमित्यनुयुञ्जानेषु विद्यापरीक्षाधिकारिषु तूष्णीमेव वदनं विवृण्वद्भ्यः किमेवमिति सपरिहासं किमपि जल्पेति पुनस्तेषु वदत्सु किमधिकोक्तिभिरहमेकं यदि जल्पामि त्वं किमिति जोषं वर्तसे त्वमप्येकं जल्पस्येव त्वञ्चाहं चानन्तरं किमिति व्यर्थं कलहायावहे जोषं भाव एव वरं दीयतां यद्रोचते तव चेतसे तन्मह्यमिति स्वोक्तिचातुर्या हासयद्भ्यस्सर्वान् तत् ज्ञातमेतत् ज्ञातं मयेति वृथा विरचित कोलाहलेभ्यः अवस्थामिमां केषाञ्चिदुद्वीक्ष्य यावदनेन दीयते तावदेवालं यदि मौर्ख्यमत्र प्रकाश्यते व्यर्थं गलहस्तिकया निवार्यामहे दुर्दान्तैरेतैर्भृत्यैर्वयमिति साधु विचिन्त्य निश्शब्दं दीयमानानि रूप्याणि गृह्णद्भ्यः क्वचित्काव्यपद्यानि क्वचिज्ज्यौतिष-श्लोकान् क्वचिद्व्याकरणसूत्राणि तानि तान्यन्यानि पठद्भ्य उच्चैरज्ञात-मुखेभ्यः प्रतिपदं स्तुवद्भ्यः कदाप्यतुष्यद्भ्यः अन्तरान्तरा आशाविशेष

In Public domain. Digitization Muthulakshmi Research Academy

दूषितान्तरङ्गतया द्विजवेषक-वचितेभ्यः मुखतेजोदर्शनेनैवाब्राह्मणा इमे नूनमित्यात्मना निश्चितेभ्यः हा परिज्ञातं महाराजेन कुशाग्रीयमतिनास्म-त्कपटमिति चकितचकितेभ्यः यथार्हं सन्तर्जितेभ्यस्तैस्तैरङ्गवङ्गकलिङ्ग मगधमहाराष्ट्रगौडमिथिलकुरुपाञ्चालघूर्जर कर्णाटलाटचोलपाण्डय-तुण्डीरमुखानेक मण्डलमण्डलात्समागतेभ्यः प्रददौ वित्तमनवधिक-मचिरात्पुरातन निजवंश्यराजाधिराजैस्सार्ध दिनद्वयदत्तं यावद्वित्तं यावते द्विजकदम्बाय तावतोऽपि द्विगुणमेवोपक्रम्य पूर्वेद्युर्विभावर्यामपरेद्युर्या-वदध्यास्ते गगनमध्यपद्धतिं भगवानंशुमाली तावदेव तावतोऽप्यति-शयितायैव द्विजनिकुरुम्बाय महाराजचूडामणी रामभूपाल-वदान्यशेखरः न तत्र कश्चिदसम्पूर्णमनोरथो वा अलालितो वा अमानितो वा अधिक्षिप्तो वासीत्समागतासु जनतासु ॥८॥

दाता रामनृपाल एष विनशस्सौवर्णमर्थिव्रजे
प्रायस्स्यात्कनकाचलोऽपि कणिकामात्रो दिनेऽस्मिन् क्षणात् ।
इत्थं स्वाश्रयहानिशङ्कितमनास्तब्धोऽथ मध्येम्बरं
तस्थौ चण्डकरो न चेदिदमसौ प्राग्वत्कुतो नास्तमैत् ॥७५॥

आहोस्वित् ॥

मदन्वयजनामभृन्नृपतिरेष रामाभिधो
महान्वितरणीत्यलं जगति कार्तिके कीर्तिमान् ।
ममावितरणि प्रथा वसुमतोऽपि नापैदिति
ध्रुवं तदहरंशुमान्वियति चिन्तया स्तम्भितः ॥७६॥

 In Public domain. Digitization Muthulakshmi Research Academy

उताहो ।।

औन्नत्यं शोभनाद्रि प्रवर कुलमणिस्सर्वदुर्वारमस्मि
न्वर्षे प्राप्नोति भूभृत्सु वितरणितया ख्यातिरिन्धेऽस्य बह्वी ।
इत्थं प्राग्विन्ध्यरोधःक्षुभिततरमनाश्छिन्तया स्तम्भिताङ्ग
स्तस्थौ मध्येऽन्तरिक्षं चिरमिह वसुमानन्यथा तद्वदन्ति ।।७७।।

श्रीरामभूमिपाले वितरति रूप्याणि कार्तिके ।
मासे स्ववितरणभियेवासीद्दुर्वर्णमयस्सदापि रजतगिरिः ।।७८।।

गद्यम् ।।

इति वितीर्य यथेप्सितमसङ्ख्याकेभ्यो द्विजन्मव्रजेभ्यः प्रदाय सुवासिनीनां परस्सहस्राणां च दक्षिणाः प्रवेशितानेतान् सर्वान् प्राकारान्तस्सरोजकुट्मलान्तस्सम्बाधनिलीन भ्रमरसमूहायमानान् समुत्थाय गोपुरकुट्टिमात्सह सर्वैर्विद्वद्बन्दैरधिकृतजनैर्धनिकनिवहैश्चा-वेदितसावधान चरणन्यासस्सविनयं किङ्करजनै स्ससम्भ्रमोपनत परिजन-विधृतपिञ्छातपत्रो वीज्यमानश्चामराभ्यां रम्यतरमङ्गलवाद्यरवमुखरीकृत-दिगन्तरालः प्रदक्षिणीकृत्य महाप्राकारगोपुरद्वारवामभागे यथापुरं तस्थिवान् सल्लपंस्तैस्तैराश्रितैर्वितरणमयीरेव कथास्तावद्वितरणानन्तर-जननिष्क्रमणपिशुन स्निग्ध गम्भीरप्रावृषेण्यपर्जन्यगर्जनतर्जनोर्जस्वल-महत्तरशतघ्नीद्वयढाङ्कारवमुखरिते हरि दन्तरे समुद्घाटिते महाकावाटे निर्गच्छति द्राघीयसान्तर्बहिःप्राकारमध्यपथेन जनमये कस्मिंश्चन बाहुतरङ्गसङ्कुले विमलवसन डिण्डीरमण्डलमण्डिते आयुष्मानेधि चिरं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitization Muthulakshmi Research Academy

महाराजेति कोलाहलमेदुरे सर्षपप्रवेशस्याप्याप्रदत्तान्तराले महाप्रवाहे आदृष्टिपातमपि कमलकुट्मलेष्विव मस्तकेष्वेव विलोक्यमानेष्वसङ्ख्येषु विजृम्भिते चान्तरान्तरा महाकोलाहले निशाकरकरनिकरपरिरम्भजृम्भित-दुग्धाब्धिवीचिच्छटाघलरिघलरवगर्वनिर्वापणधूर्वहे चिरान्निर्गतायां गोपुरद्वाराद्विजसंहतौ जह्नुमुनिकर्णविवरपथादिव जाह्नव्यान्तदनु-विश्चतोमुखायां प्रसूतायामिव नगरवनितया प्राकारगर्भाद्यथायथं विप्रकीर्णेष्विव तत्तद्वासभुवमुपागतेषु सभक्तिभरैस्सकुतूहलैस्सादरैः पौरैरुपचर्यमाणेषु तेषु तेषु द्विजेषु विलोक्य विलोक्य सर्वान् साञ्जलिबन्धं तच्चरणारविन्दमधूलिं धूलिं निधाय शिरसि निजे पश्चादुपागतां यथाक्रम-मारुह्य शिबिकां यथापुरं प्रविश्य निजमन्दिरमतिसुन्दरं निष्पादित-तात्कालिककृत्यो बभार मुदममितम्पचाम् ॥९॥

अपरेद्युरुदीते चान्धङ्करणे कैरविणीनां सिद्धाञ्जने पद्मिनीनां कस्मिंश्चज्ज्योतिर्बृन्दे निजाभ्यर्थनया प्रवर्तिते सत्रे दीयतां दीयतामन्नमिति सर्वतो विजृम्भिते कोलाहले हरिततरकदलिकापत्रमरकत सिंहासनाधि-रूढेन शाणोल्लीढहीररेखासेर्मयाघृतधारया सहधर्मचर्या परिरब्धेन निजगुणानुरूपेण सुवर्णरूपेण शमिततापेन सूपेन सचिवेन जनित जगदानन्दकन्दसरस-तरखण्डकूश्माण्डदुर्वाररसोर्वारुकफलविविधरस मूर्तवार्ताकतोषितजनजिह्वापटलपटोलशाकैरङ्गैरसैष्षड्भिर्गुणैस्सहकारा-मलक तिन्त्रिणीमयेनोपदंशेन शक्तित्रयेण सुन्दरतरमाकन्दादिफल-बृन्दैस्सेनाधिनाथै रतिरसैरतिरसैर्मनोहरैर्मनोहरैर्निखिलजगन्मोदकैर्मोद-कैस्संवर्धितजनहेलिका-भिर्होलिकाभिरुज्जृम्भितरसाटोपैश्शष्कुल्याद्यपूपैः

In Public domain. Digitization Muthulakshmi Research Academy

परिजनैः मार्जिकादधिमार्जिकाभ्यां चामरग्राहिणीभ्यां मृणालतन्तुसच्छा-त्रागोधूम पिष्ट विरचित सेवाभिधानभक्ष्यविशेषैश्चामरैश्च परिगतेना-खण्डमण्डदधिखण्डविमल वाससापूतेन मारान्तकसीरायुध तारापतिदीप्ति-दोराहवधीरेण क्षीरेणाभिषिक्तेन पप्पलाभिधानधवलात पत्रपरिष्कृतेन निगृहीततृष्णा सहधर्मचरीपरिरब्ध क्षुद्धारप्रतिपक्षिराजेन शाल्योदन-महाराजेन शुद्धात्मनात्मनेव तोषितेषु सर्वेषु विप्रवर्गेष्वसङ्खेषु दुग्धघृतधारानदीमातृकायमाणे प्राकारान्तरे इतश्च दीयतां ताम्बूलमितश्च कुसुममाल्यानीतश्च दक्षिणा इतश्च चन्दनमितश्च पटवासक इति सर्वत्रापि निजाज्ञया समर्प्यमाणेषु विप्रवर्गाय परिजनैस्समग्र-वस्तुषु तदनुगृहीतान् सफलान्मन्त्राक्षतान् परिगृह्य महाराजचूडामणे वदान्योऽसि चतुरोऽसि गभीरोऽसि धीरोऽसि दयालुरसि मितभाषणोऽसि स्मितभूषणोऽसि घनदाक्षिण्योऽसि कृतज्ञोऽसि सत्यप्रतिज्ञोऽसि विनीतोऽसि विद्वानस्युचितज्ञोऽसि भावज्ञोऽसि यशोधनोऽसि किम्बहुना गुणानां निधिरसि समेधिषीष्ठा आचन्द्रतारकमचिरादेव निजगुणानुरूपगुणं सुकुमारं कुमारं प्राप्नुहि श्रीकेशवदेवदिव्यानुग्रहेणाभिवर्धतां तव साम्राज्यमित्याद्यत्यादरात्तैरा-शास्यमानानि मङ्गलवचनान्यभिनन्दन् कृताञ्जलिर्यथोचितं विसृज्य तांस्तान् प्रीणातु भगवान् श्रीकेशवोऽनेन कोटितुलसीसमर्पणतुलाभारमहोत्सववसुवितरणेनेति तमभिप्रार्थ्य साञ्जलिबन्धं प्रविश्य निजभवनमवलम्बते स्मामन्दमानन्दम् ॥१०॥

यश्श्रीमान्यमुदारशेखरमणिं शंसन्ति सर्वे जना
येनाप्तास्सकलाः कला विदधते यस्मै प्रणामान्नृपाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitization Muthulakshmi Research Academy

यस्मादेव धनाधिपन्ति कवयो यस्य प्रसन्नो हरि
र्यस्मिन्खेलति धीस्स एष जयताच्छ्रीरामभूमीपतिः ।।७९।।

तत्तद्दुर्मतिदूषितानघमहासाहित्य विद्या परि
श्रान्त्युद्भूननजीवनौषधमिह श्रीदीक्षितार्यः कविः ।
यस्यार्धासनभाक्पुराणसमये विद्यागुरुस्सादरं
सर्वार्थानुपदर्शयत्यनघधीश्चातुर्यसीमानिशम् ।।८०।।

स्वैरं गद्वालदीव्यद्धरि परिचरणप्राप्तहर्षो गुणौघै
श्श्लाघ्यो विद्यागुरुं यो बहुमतिभिरलं दीक्षितं चाभ्यरक्षत् ।
धात्रीशश्लाघ्यचर्यः कुशलवरणतः प्राप्तमोदो वदान्य
स्सोऽयं श्रीरामभूमीपतिमकुटमणिर्वर्धतां सार्थनामा ।।८१।।

दिग्दन्तावलसन्ततेः प्रविदधत्यै रावणश्रीभरं
यत्कीर्तिर्विजरीहरीति निखिलान् दुग्धोदयन्त्यम्बुधीन् ।
स श्रीरामनृपालशेखरमणिर्गद्वालपुर्यां ददद्
विप्रेभ्यो धनमूर्जितं वसुमतीं रक्षंश्चिरादेधताम् ।।८२।।

श्रीवासब्रह्मतन्त्रादिमपद कलिजिद्दैशिकेन्द्रानघाङ्घ्रि
द्वन्द्वाब्जानुग्रहात्त प्रतिपदविविधग्रन्थ निर्माणशक्तिः ।
यो हृष्टान्विद्वदग्र्यान्व्यतनुत वनपर्तीश्वरास्थानविद्या
न्राजेन्द्रैर्नित्यमान्यस्समदकविघटा गण्डभेरुण्डलक्ष्मा ।।८३।।

In Public domain. Digitization Muthulakshmi Research Academy

सोऽयं दिग्दन्ति कुम्भस्थल परिविलसन्मौक्तिकत्कीर्तिशालि ।
श्रीमत्प्रत्यग्रदुर्गाभिधनगरकनद्वेश्म तातार्यसूरेः ।
द्वैतीयीकस्तनूजो व्यतनुत रभसात्कृष्णनामा कवीन्द्र
स्तामेतामूर्जमासोत्सवसरणिमहादीपिकामेकघस्रम् ॥८४॥

वैतण्डिकधुरिकविता सैषा मा पततु सरसबुधभोग्या ।
अतिललितपदन्यासा रम्या रम्भेव रावणस्य करे ॥८५॥

स्फुटकुचमुखवर्णायाः कृतिकन्याया अति प्रवृद्धत्वम् ।
को वा सहेत रसिकस्तदियं रचिता किलातितन्वङ्गी ॥८६॥

जयतु जगति कार्तिकोत्सवश्रीर्जयतु च रामनृपालशेखरश्रीः ।
जयतु सुकवि काव्यसन्ततिश्रीर्जयतु च शेषगिरीश्वरोत्सवश्रीः ॥८७॥

इति श्रीप्रत्यग्रदुर्गाभिजनश्रीशैलकुलतिलक श्रीमत्तातार्यवर्य-कृष्णाम्बयोर्द्वैतीयीकनन्दनस्य श्रीकृष्ण कविसार्वभौमस्य कृतिषु कार्तिकोत्सवदीपिकाख्यश्चम्पू प्रबन्धषष्ठः ॥

कार्तिकोत्सवदीपिका समाप्ता

श्रीमते श्रीनिवासब्रह्म तन्त्रपरकालमहादेशिकाय नमः ॥

श्री गद्वाल केशवस्वामिचरणारविन्दार्पणमस्तु ॥

CC-0. Digitization Muthulakshmi Research Academy

श्लोकानुक्रमणिका

अ
अतिमितमति - ५
अथ सरभस - ४०
अधिरुह्य - ४५
अधुना - २८
अनुक्त्वैवम् - ७२
असङ्खाता - ३१
अस्ति समस्त - १७
आ
आचार्या - ५८
आद्यत्केचिद - ३८
उ
उत्सवशतै - १९
उदार श्रीराम - ६३
ऊ
ऊर्जेमास्यत्र - ५४
औ
औदार्याद्भव - ६६
औन्नत्यम् - ७७
क
कवीन्द्राणाम् - ५०
कार्येणोह्यं - ६२
काव्यालङ्कृति - ३०
कोटितुलसी - ४२
केशवमोदकर - ३
ग
गद्वालनगर - २०
गिरिं हस्ते - १५
गुणानाम् - ६४
ज
जगति निखिलै - ५६
जयतु जगति - ८७
त
तत्तद्दुर्मति - ८०
तत्ताद्दक्ष - २
तत्ताद्दक्कवि - ५२
तनूजोऽस्य - २४
तस्मादस्माद्दृशो - २१
ताद्दशकविताभावा - ७
तामिह - २९
तिरुमलराय - २३
तुल्यं यस्य - ४४
त्वद्दत्तं - ७१
द
दाता रामनृपाल - ७५
दिग्दन्तावलसन्ततेः - ८२
देवानामपि - ३९
द्विरदालस - ३६
ध
धरणितलं - ३४
धृत्वा भूषां - १०
न
निजकान्त - ३७
निजवल्लभाय - ७३
नृपतिस्तुति - १३
प
प्रदत्तेऽप्य - ५१
प्राक्तनकृते - ९
प्राचीनाः - ६
प्राचीनानल - ११
प्रौढिस्तव - ६८
ब
बध्यन्ताम् - ७४
ब्रह्माण्डा - ४८
भ
भवान्निष्कपटो - ६९
म
मदगरिम - ५३
मदन्वय - ७६
मा कुप्य - ४९
मितोऽप्यालाप - ५७
मृदुलं वा - ८
य
यं त्वद्दष्टि - ६०
यथा रामे - ३२
यश्श्रीमान्य - ७९
र
राजाऽसि - ६७
रिपुपङ्क्तिकण्ठ - ७०
व
वसन्तदिवसो - २६
वितनोषि - ५५
वेदण्डोद्दण्ड - २२
वैतण्डिक - ८५
श
श्रीमद्वैष्णव - ६५
श्रीमन्तः - १२
श्रीमन्मङ्गल - १
श्रीरामक्षितिपाल - ६१
श्रीमभूमिपाले - ७८
श्रीवासब्रह्म - ४, ८३
स
संवत्सरेष्व - ३५
सकलजगताम् - ४३
सद्वारोन्नत - १८
सफलानारचया - ४१
सरसकविवचन -१६
सरसवचन- ४७
सामन्मावलि - २५
सीतारामाभिध - २७
सोऽयंदिग्दन्ति - ८४
स्वैरं गद्वाल - ८१
स्पष्टं भगवद्गदितं - १४
स्मितश्रीस्ते - ५९
स्वार्पितम् - ४६
स्फुटकुचमुख - ८६
ह
हरिपदपदचर्या - ३३

In Public domain. Digitization Muthulakshmi Research Academy

गद्यसूची

गद्य क्रम सङ्ख्याः	गद्यारम्भः	गद्यसङ्ख्याः	पुटसङ्ख्या
१.	या खलु निखिल	२९ श्लोकानन्तरम्	९
२.	समये तस्मिन्	३७ श्लोकानन्तरम्	११
३.	तदनु प्रविश्य	३९ श्लोकानन्तरम्	१४
४.	अथ तत्र महेन्द्र	३ गद्यानन्तरम्	१५
५.	अथ तत्र विचित्र	४० श्लोकानन्तरम्	१६
६.	इति कविकुलतिलक	७२ श्लोकानन्तरम्	२४
७.	तदनु निजतेजः	७३ श्लोकानन्तरम्	२४
८.	इत्याज्ञाप्य	७४ श्लोकानन्तरम्	२५
९.	इति वितीर्य	७८ श्लोकानन्तरम्	३०
१०.	अपरेद्युरुदीते	९ गद्यानन्तरम्	३१

 CC-0. Digitized by eGangotri Digitization Muthulakshmi Research Academy

छन्दःप्रयोगमालिकाविशेषांशाः

क्रम सङ्ख्याः	छन्दः नाम	पद्यसङ्ख्याः
१.	अनुष्टुप्	६८,६९
२.	आर्या	३,५,७,८,९,१३,१४,१६,१७,१९,२०,२८, ३४,३५,३६,४०,४१,४२,४४,४५,४७,५३, ५५,६२,६७,७०,७१,७३,७८,८५,८६
३.	मालिनी	३३
४.	शिखरिणी	२४,३१,३२,५०,५७,५९,६३,६४,७२
५.	हरिणी	४३
६.	पृथ्वी	१५,७६
७.	कामदत्ता	८७
८.	नर्कुटम्	२३
९.	शर्दूलविक्रीडितम्	१,२,६,११,१२,१८,२५,३०,३८,३९,४८, ४९,५२,५८,६०,६१,६५,६६,७५,७९,८०
१०.	मत्तेभविक्रीडितम्	३७
११.	स्रग्धरा	४,१०,२१,२२,२७,५४,७४,७७,८१,८३, ८४

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023



ISBN - 978-93-80171-89-0